योगतन्त्रग्रन्थमाला

(२)

तन्त्रागमसंग्रहः

[प्रथमो भागः]

म० म० श्रीगोपीनाथकविराजमहोदयेन

सङ्कलितः

Δ:3x1;1
15L0.1

वाराणसेय-संस्कृत-विश्वविद्यालयः

वै० सं० २०३६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

△:3x1,1 7881
15L0.1
Shukla, Badri Nath
Upāgamasaṃgraha

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Δ:3x1,1
15L0.1
7881

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Purchased by [illegible]
Chandra Shekhar Sharma Hiremath
S. Sanskrit University, Varanasi.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

YOGATANTRA-GRANTHAMALA

Vol. II

General Editor
Badari nath Shukla
Director
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

LUPTĀGAMASAṄGRAHA

[Part I]

Collected & Edited

by

M.M. Pt. GOPINATH KAVIRAJA
Head of the Dept. of Yogatantra
Varanaseya Sanskrit Vishvavidyalaya, Varanasi

VARANASI
1970

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Published by :—
Director, Research Institute
Varanaseya Sanskrit Vishvavidyalaya
Varanasi.

Printed by :—
Sansar Press, Sansar Ltd.
Kasipura, Varanasi.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Purchased by Contingency Grant of U. G. C.
Chandra Shekhar Sharma Hitemath
S. Sanskrit University, Varanasi.

योगतन्त्र-ग्रन्थमाला

(२)

प्रधानसम्पादकः

बदरीनाथशुक्लः

सञ्चालकः

अनुसन्धानसंस्थानम्

वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी ।

लुप्तागमसंग्रहः

[प्रथमो भागः]

सङ्कलयिता सम्पादकश्च

म०म०प० गोपीनाथकविराजमहोदयः

योगतन्त्रविभागाध्यक्षः

वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी ।

वाराणस्याम्

१८९२ तमे शकाब्दे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राप्तिस्थानम्—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी–२

A:3x1,1
15L0.1

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 7881

प्रथमावृत्तिः ५०० प्रतयः।
मूल्यम् १२) रूप्यकाणि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

INTRODUCTION

Years ago when I was making a special study of Tantrik literature in its sources I used to be struck from time to time with the remarkable depth of wisdom and clarity of insight in the more or less obsolete Agama works quoted in the later literature. Out of sheer curiosity I began to make for personal use a systematic collection of these loose fragments of ancient texts. In course of time this developed into a pretty good collection which seemed to be worthy of publication. The process of collecting the fragments is still in progress. But it has been thought wise to bring out without further delay as much material as is ready for the press and not to wait till the collecting process is completed.

These fragments are culled from a variety of sources and even as they are in their whole or mutilated form they have a value of their own in building up the fabric of a half-forgotten or mutilated spiritual culture of great eminence. Many of these fragments are distinctly very old and some others which are not very old but yet retain intact the implications of the ancient traditions.

The present compilation which consists of extracts from nearly 221 works (and authors) is based on quotations from 16 works. The original source works from which the fragments have been collected are varied, including Tantra Texts, old commentaries, Stotras, Prakaranas and works of other denominations.

2 A, Sigra,
Varanasi.

Gopi Nath Kaviraj
31-3-70

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आद्यमावेदनम्

निगमागमा एव सम्पूर्णाया भारतीयायाः संस्कृतेः समग्रस्य भारतीयस्य वाङ्मयस्य च मूलम्। तत्र निगमो वेदः, आगमस्तन्त्रम्। वेदा ऋग्, यजुः, साम, अथर्वेति चत्वारः, तन्त्रं वैदिकं बौद्धम् आर्हतं चेति त्रितयम्। तेषु वैदिकं वैष्णवं शैवं शाक्तं चेति त्रिविधम्। तत्र वैष्णवं द्वैतदृष्टिप्रधानम्, शैवं द्वैताद्वैतदृष्टिभेदेन द्विविधम्, शाक्तं चाद्वैतदृष्टिप्रधानमिति बहवो वदन्ति। परं वास्तवी तन्त्रदृष्टिस्त्वन्यादृश्येव। यथोक्तम्—

द्वैतादन्यदसत्यकल्पमपरैरद्वैतमाख्यायते
तद्द्वैते बत पर्यवस्यति कृतं वाचाटदुर्विद्यया।
एते ते वयमेवमभ्युदयिनः कस्यापि कस्याश्चिद-
प्यालस्योज्झितमैकरस्यमुभयोरद्वैतमाचक्ष्महे ॥

संविदुल्लासस्य एतद्वचनानुसारेण शिवाशिवयोः, शब्दतदर्थयोः, जीवजगतोः, जगज्जगदीशयोः, ज्ञानज्ञेययोः, भोगमोक्षयोश्च सामरस्यलक्षणं तादात्म्यमेव तन्त्रानुमतं तत्त्वम्।

मानवानां हृदयस्पर्शिनोऽस्य यथार्थस्य प्रतिपादनादेव तन्त्रं पुरा सर्वत्र विततं सर्वजनोपादेयं चाभवत्। आसीदिदं देशस्य किमपि दुर्दैवं यद्वशात् तान्त्रिको लोको भोगैकलक्ष्यो भवन् तान्त्रिकं ज्ञानमनुष्ठानं च भौगैकसाधनं मन्वानो भोगसाधनस्य च स्वात्मसात्करण एव स्वश्रेयोऽनुसन्दधानस्तदुभयं तथा गोप्यमकरोद् यथा तद् विरलप्रचारं भवद् विलयोन्मुखतां प्रत्यपद्यत। अस्याः प्रवृत्तेः परिणामतयाऽनेक आगमाः कालक्रमेण व्यलुप्यन्। तादृशागमानां यानि कानिचिद् वचनान्यनन्तरप्रणीतेषु विभिन्नग्रन्थेषु यत्र तत्रोद्धृतान्युपलभ्यन्ते, तेषां संग्रहस्तत्स्रोतोगवेषणं चातितरां दुरूहम्। यतो हि विद्वांसो विभिन्नान् ग्रन्थानधीयाना गजनिमीलिकया तत्रोद्धृतानि वचनानि प्रायेण समुपेक्षन्ते तन्मूलान्वेषणेऽलसस्वभावतया च न व्याप्रियन्ते, परं प्राच्यप्रतीच्यविद्याविपश्चिदपश्चिमाः साध्वनामयजीवनाः श्रीगोपीनाथकविराजमहोदयाः साधारणाध्येतृजनानामस्याः स्वाभाविक्याः प्रवृत्तेरपवादभूताः, त ईदृशा गम्भीरा गवेषकाः स्वाध्यायशीला मनीषिणश्च येऽधीयमानग्रन्थानामेकां मात्रामेकं वर्णं चापि न स्तोकमप्युपेक्षन्ते। ते हि तत्तद्ग्रन्थानुशीलनसमये यत्किमप्यक्षिगोचरीकुर्वन्ति, तस्य प्रामाणिकं स्रोतो यावन्नाधिगतं कुर्वन्ति तावन्न विश्राम्यन्ति नू चे तदन्वेषणाद् विरमन्ति। आत्मनोऽस्या अध्ययनप्रकृतेरेव ते तत्र तत्रोपलभ्यमानानां तन्त्रवचनानां स्रोतःसमुपलम्भे प्रयत्नशीलाः सन्तो लुप्तागमानां प्रस्तुतस्य संग्रहस्य सम्पादने सफला अभूवन्।

अस्मिन् संग्रहेऽकारादारभ्य हकारान्तं वर्णक्रमेण मूलागमानामुल्लेखपूर्वकं तदीयवचसां विन्यासोऽधस्तनटिप्पण्यां तद्द्धरणस्थलानां संक्षिप्तो निर्देशश्च कृतो वर्तते। वचांसि च तानि सर्वाण्येव निरतिशयमहत्त्वमर्थजातं प्रकाशयन्ति जगतोऽपूर्वं हितमाधातुं प्रभवन्तीति निर्विवादम्। तेषु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कियतामुदाहरणरूपेणात्रोपन्यासो मन्ये, मनीषिणां मनोमोदं नूनं विदध्यादिति तदर्थं स्वल्पो यत्न आश्रीयते। तद् यथा—

मा किञ्चिद् त्यज मा गृहाण।

अनुत्तराष्टकस्यानेन वचनेन हिताधायकस्य कस्यापि कयाऽपि दृशाऽत्याज्यताम-हितावहस्य च कस्यामपि स्थितौ कुतोऽपि हेतोरग्राह्यतामुपदिशता मानवस्य महत्तमं श्रेयः संविधीयते।

बालिकारचितवस्त्रपुत्तिकाक्रीडितेन सदृशं तदर्चनम्।
यत्र शाम्यति मनो न निर्मलस्फीतचिज्जलधिमध्यमाश्रितम्॥

अर्चनात्रिंशिकाया अनेन वचनेनेदं तथ्यमुपदिश्यते यद् यथा बालिका वस्त्रैः पुत्तलिका निर्माय ताभिः क्रीडन्ति, परं ताभ्यो न किमपि लभन्ते, निरर्थकमेव भवति तत् क्रीडितम्, तथैव येनार्चनेनार्चितुर्मनो निर्मले निरवद्ये चिन्नीरधौ निमज्ज्य शान्तिं नासादयति तदर्चनमपि सर्वथा व्यर्थमेव।

गुणैरुपेताऽपि तु सिद्धविद्या कन्येव दत्ता गुणवर्जिताय।
सम्भोगहीना विदधात्यकीर्तिं दातुर्यतस्तत्प्रगुणाय दद्यात्॥

यथा निर्गुणाय दत्ता गुणवत्यपि कन्या प्रतिग्रहीत्रा यथोचितमनुपयुज्यमाना दातुरकीर्तिं तनुते, तथैव गुणगणगरिष्ठापि सिद्धविद्याऽपात्राय दीयमाना सम्यगनुपयोगाद् विद्यादातुर्यशो हिनस्त्यतः प्रकृष्टगुणायैव कन्याविद्ययोः प्रदानं श्रेयस्करमिति तत्त्वं कल्लटाचार्यस्य प्रकृतेन वचसा विज्ञाप्यते।

पतन्ति जन्तवो येन कर्मणा नरके ध्रुवम्।
उत्पतन्ति च तेनैव त्रिकालज्ञा भवन्ति च॥

कालिकामतस्य वचसानेन तत्त्वमिदं सम्यक् स्फुटीकृतं यद् यदेव कर्म प्राणिनां पातकं, तदेव भावभेदेनानुष्ठितं तेषामुन्नायकं सम्पद्यते।

प्रत्यक्षेण यथा वृक्षो रूपमात्राद् विगृह्यते।
रसादयो गृहीता नो तथेशो ज्ञानशक्तितः॥
गृह्यते तत्त्वभावेन वस्तुभावविवर्जनात्॥

किरणागमस्य वचनमिदं तत्त्वमिदं सम्यक् स्पष्टयति यद् यथा रूपरसादीनामाश्रयो वृक्षश्चक्षुषा रूपवत्तयैव दृश्यते न रसादिमत्तया, तथैव तत्त्ववस्तुभेदेन भावद्वयात्मा शिवः साधक-ज्ञानेन तत्त्वभावेनैव गृह्यते न वस्तुभावेन।

शिवाद् गुरुतरा भक्तिर्यस्य नित्यं गुरौ सदा।
तस्य देयमिदं ज्ञानमन्यथा न कदाचन॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तन्त्रस्य वचसाऽनेन गुह्यस्य तान्त्रिकज्ञानस्य पात्रता तत्रैव निर्णीता ,यो गुरुं शिवादपि गुरुतरं मन्येत ।

न मलो मलिनः कश्चिद् विद्यते वस्तुतः प्रिये ।
स्वमनोमलिनत्वेन मलमात्मनि कथ्यते ॥

निशाकुलस्य वचनमिदं मनोमालिन्यमेवात्मनो मलिनताया मूलमुद्घोषयत्तन्निराकृतय एव साधकेन सावधानेन भाव्यमित्यभिव्यनक्ति भव्यमर्थम् ।

यथा वायुः सुशीघ्रोऽपि मुक्त्वाऽऽकाशं न गच्छति ।
ज्ञेये निक्षिप्तचित्तस्तु विषयस्थो न मुञ्चति ॥

अनेन निःश्वासागमवचनेन तत्त्वमिदं स्फुटं प्रतिपाद्यते यद् यथा वेगवत्तरोऽपि वायुराकाशं विहातुं नार्हति, तथैव ज्ञेये परे तत्त्वे सन्निवेशितं चेतो विषयाभिमुखं ज्ञेयं परं तत्त्वं परित्यक्तुं न क्षमते ।

यद्वत् सोपानेन प्रासादमारुहेत् प्लवेन वा नदीं तरेत् ,
तद्वच्छास्त्रेणैव हि भगवान् शास्ताऽवगन्तव्यः ।

पाञ्चरात्रश्रुतेरनेन वचसा प्रासादारोहणे सोपानस्येव नदीतरणे प्लवस्येव च परमात्मबोधे शास्त्रस्यानिवार्योपादेयत्वं प्रतिपाद्यते ।

'संशयानो न सिध्यति'

ब्रह्मयामलस्य वचसाऽनेन संशयस्य सिद्धिबाधकत्वं वदता संशयत्यागः साधकस्य प्रथमकर्तव्यतया ध्वनितः ।

हंसाः पतन्ति गगने प्रविसार्य पक्षौ
स्वौ सर्वदैव किल मानसराजहंस ।
अत्यद्भुता तव गतिर्गगने परस्मिन्
विक्षेपशून्यमयपक्षयुगं विहाय ॥

मनोऽनुशासकस्तोत्रस्थानया गिराऽयमर्थः स्फुटीकृतो यत् प्रसिद्धा हंसाः पक्षयोः सहायतयैव भौतिके गगने गतिमन्तो भवन्ति, परं मनोरूपो राजहंसो विक्षेपशून्यतात्मकौ पक्षौ त्यक्त्वैव परतत्त्वात्मके गगने गतिमान् भवति ।

गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ।
प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत् ॥

अनेन महास्वच्छन्दवचसा तन्त्रविद्याया आविर्भावस्य रहस्यमिदं स्थानं उद्घाटितं यत् स्वयं भगवान् सदाशिव एव गुरुशिष्यरूपेण प्रादुर्भूय प्रश्नोत्तररूपेण तन्त्रं रचयाञ्चकार ।

इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताम् ।
स्वभावेन समाराध्य ज्ञातुः सोऽयं महामखः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुख्याम्नायरहस्यविधेरनयोक्त्या घ्राणादिभिर्गृहीतैर्गन्धादिविषयैः स्वात्मनस्तर्पणमेव ज्ञातुर्महायाग इति प्रत्यपादि ।

शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते ।
शक्तयश्च जगत्सर्वं शक्तिमांस्तु महेश्वरः ॥

रहस्यशास्त्रस्य वचनमेतदमुमर्थमवद्योतयति यत् प्रामाणिकौ पदार्थौ द्वावेव, शक्तिः शक्तिमांश्चेति । तत्र चराचरात्मकं समग्रं जगदेव शक्तिः, भगवान् महेश्वर एव च शक्तिमान् ।

न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः ।

रौरवागमस्य वचनमिदं तान्त्रिक्या दीक्षया संस्कृतस्य मनुजन्मनः पुनर्जन्मराहित्यलक्षणां मुक्तिं स्फुटं प्रतिपादयति ।

"विश्वमिदं मन्मयं मत्कार्यत्वात्, यदित्थं तत्तथा यथा शरीरम्, इदं च मम कार्यं तस्मान्मन्मयम् ।"

अनेन शम्भ्वैक्यदीपिकावचनेन तत्कार्यत्वं तन्मयत्वव्याप्यमिति नियमं पुरस्कृत्य भगवत्कार्यस्य जगतो भगवन्मयत्वं समर्थितम् ।

व्याधीनां भेषजं यद्वत् प्रतिपक्षः स्वभावतः ।
तद्वत् संसारदोषाणां प्रतिपक्षः शिवः स्मृतः ॥

अनेन शिवधर्मोत्तरवचनेन भेषजसेवया व्याधय इव शिवसेवया संसारदोषा विनश्यन्तीति सत्यं निस्संशयं प्रत्यपादि ।

न हि बोधो विचित्रार्थनिर्माणेऽन्यमपेक्षते ।
संकल्पादेव यो रूपसहस्राणि सृजत्यजः ॥

षाड्गुण्यविवेकस्य वचसाऽनेनायमर्थोऽवद्योत्यते यन्नित्यबोधात्मको भगवान् संकल्पमात्रेणैव सर्वं जगत् सृजति न किमपि निमित्तान्तरमपेक्षते ।

अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते ।
यैरुपायाः प्रतन्यन्ते नूनं त्वां न विदन्ति ते ॥

संविल्प्रकाशस्य वचनमिदं बोधात्मनो भगवतः साधनानपेक्षामपरोक्षतां प्रतिपादयदर्थममुं विशदं व्यञ्जयति यदज्ञातस्य सत्त्वे मानाभावेन सर्वस्य ज्ञानानुविद्धताया आवश्यकतया प्रकाशमानं सर्वं ज्ञानेन सहैव प्रकाशत इति प्रत्येकमेव ज्ञानं बोधात्मकं भगवन्तं शिवं गोचरयतीति तज्ज्ञप्तौ नोपायान्तरापेक्षा ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न पूजा बाह्यपुष्पादिद्रव्यैर्या प्रथिताऽनिशम् ।
स्वे महिम्न्यद्वये धाम्नि सा पूजा या परा स्थितिः ॥

संकेतपद्धतेरनेन वचसा सत्योऽयमर्थः सम्यक् स्फुटीकृतो यद् बाह्यपुष्पादिरूपैर्द्रव्यैः क्रियमाणा पूजा न वास्तविकी पूजा, अपि तु स्वमहिमलक्षणस्याद्वयधाम्नोऽवबोधलक्षणा पूजैव वास्तविकी पूजा ।

नान्यत्र गमनं स्थानं मोक्षोऽस्ति सुरसुन्दरि ।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते ॥

सर्वज्ञभैरवस्य वचनमिदं तथ्यमिदमुचितं प्रकाशयति यन्मोक्षो नाम न क्वचित् स्थान-विशेषे गमनम्, अपि तु अज्ञानग्रन्थेर्विच्छेद एव ।

न पुम्भिरार्षवाक्यं च वैदिकं चर्षिभिस्तथा ।
न वेदैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मजैः ॥
न शैवं विष्णुवचनैर्बाध्यते तु कदाचन ।

सर्वज्ञानोत्तरस्यानेन वचनेन पौरुषेयवचसा ऋषिवचनस्य, आर्षवचसा वेदवचनस्य, वेदवचसा ब्रह्मवचनस्य, ब्रह्मवचसा विष्णुवचनस्य, वैष्णववचसा शिववचनस्याबाध्यतां ब्रुवता तन्त्रशास्त्रात्मनः शैववचसः सर्वतो वैशिष्ट्यं विस्पष्टीकृतम् ।

न हृष्यत्युपकारेण नापकारेण तृप्यति ।
यः समः सर्वभूतेषु जीवन्मुक्तः स कथ्यते ॥

सर्वज्ञानोत्तरस्यैतद्वचनानुसारेण स एव पुरुषो जीवन्मुक्तो यः स्वं प्रति कृतेनोपकारेण हृष्टोऽपकारेण च रुष्टो न भवति, अपि तूपकर्तरि, अपकर्तरि, तटस्थे च समभावस्तिष्ठति ।

(१)

सेव्यन्ते गुरवोऽनेके ज्ञानविज्ञानभासुराः ।
दुर्लभोऽयं गुरुर्देवि योऽहङ्कारक्षयङ्करः ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाहङ्कारनिर्मुक्तः केवलो विदितः स्वयम् ॥

(२)

बुद्धिप्राणशरीराख्ये यदेतस्मिन् पुरत्रये ।
अहङ्कारात् त्रसत्यात्मा तेनायं पुरुषः स्मृतः ॥
एतत्पुरत्रयं दग्धं येन स त्रिपुरान्तकः ।
स एव पुरुषः प्रोक्तः स्मरारिरपि स स्मृतः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हंसभेदस्य वचोभिरमीभिः शिष्यस्याहङ्कारक्षपणं गुरोः कर्तव्यम्, अहङ्कारात्मनो विमोचनमेव अध्ययनादेः प्रयोजनम्। बुद्धिः प्राणाः शरीरमित्येतत्त्रयमेव त्रिपुरम्, एष्वहंभावेन ग्रस्तः पुरुष एव त्रिपुरासुरः स्मरश्च, एतेष्वहम्भावस्य विलयनमेव त्रिपुरस्य कामस्य च दाहः, एतत्कर्ता पुमानेव त्रिपुरान्तकः कामान्तकश्च शिव इत्येव तत्त्वं स्फुटीकृतम्।

तदित्थं महार्थसार्थसमुपस्थापकस्य लुप्तागमसंग्रहस्य प्रथमं भागं पण्डितानां पुरतः प्रकाशं प्रापयतो वाराणसेयसंस्कृतविश्वविद्यालयस्य परिवारेण प्राप्यमाणः प्रमोदो नितरां वाचामगोचर इति प्रवेदयतो मे महान् मनस्तोषः। अस्य संग्रहस्य सङ्कलनया कविराजमहाभागैर्न केवलं तान्त्रिकवाङ्मयस्य विलुप्यमानं वैभवमेव रक्षितमपि तु तान्त्रिके ज्ञाने निष्ठां दधानो महान् जनसमुदायोऽपि चिरमुपकृतः। अतः कविराजमहाशयाः समग्रस्य विद्यारसिकस्य जगतो निस्संशयं हार्दान् धन्यवादानर्हन्ति।

आशासे, कविराजमहोदयानामनुकार्यया गभीरया विद्याऽऽराधनया प्रेरितास्तदाध्यक्ष्ये योगतन्त्रविभागे कार्यं कुर्वन्तोऽपरेऽपि विद्वांसस्तन्त्रसम्बन्ध ईदृशेषु स्तुत्यकार्येषु सोत्साहं स्वात्मसमर्पणं करिष्यन्तीति।

वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी।

बदरीनाथ शुक्लः
अनुसन्धानसंचालकः
८-३-७०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विषयानुक्रमणी

Introduction .... क
आद्यमावेदनम् .... ख–छ
संगृहीतग्रन्थग्रन्थकारनामानि ... . ज–ट

अचिन्त्यागमः १
अद्वयोल्लासः २
अनन्तविजयागमः २
अनिरुद्धः २
अनुत्तरभट्टारकः ३
अनुत्तराष्टकम् ३
अनुप्रत्यभिज्ञा ३
अनुभवस्तोत्रम् ४
अभेदकारिका ४
अर्चनात्रिंशिका ४
अशेषकुलवल्लरी ४
आगमः ५
आगमरहस्यम् ६
आचारप्रकरणम् ७
आज्ञावतारः ७
आत्मसंबोधः ७
आत्मसततिः ७
आनन्दभैरवः ८
आलोकमाला ८
इष्टोपदेशः ८
उच्छुष्मभैरवः ८
उत्तरपदम् ८
उद्धारोर्ध्वतन्त्रम् ९
उपचारोपनिषत् ९
उपायविंशतिः ९
ऊर्मिकौलसिद्धसन्तानशास्त्रम् ९
ऋजुविमर्शिनी १०
कक्ष्यास्तोत्रम् ११
कर्मकाण्डक्रमावली ११
(भट्ट) कल्लटः १२
कामसिद्धिस्तोत्रम् (वत्सराजकृतम्) १२
कामिकः १२
कालपरा १३
कालिकाक्रमः १४
कालिकामतम् १६
कालोत्तरसूत्रम् १६
किरणागमः १७
कुब्जिकातन्त्रम् २२
कुब्जिकामतम् २४
कुलगुह्वरः २५
कुलचूडामणिः २७
कुलपञ्चाशिका २७
कुलयुक्तिः २७
कुलरत्नमाला २८
कुलसारः २८
कुलाम्नायः २८
क्रमकेलिः २८
क्रमवासना २९
क्रमसद्भावः ३०
क्रमसिद्धिः ३२
क्रमसूत्रम् ३३
क्रमस्तुतिः ३४
क्रमस्तोत्रम् ३४
क्रमोदयः ३८
क्रियाकरणमण्डनम् ३८
चन्द्रज्ञानम् ३९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चन्द्रज्ञानविद्या	४०	नवरत्नमालिका	६७
चरणसूत्रम्	४३	नवशतीशास्त्रम्	६७
चिच्छक्तिसंस्तुतिः	४३	नागार्जुनः	६७
जयरथगुरुः	४४	नाथपादाः	६७
जयरथपरमगुरवः	४४	नारदसंग्रहः	६७
जयाख्यसंहिता	४५	निशाकुलम्	६८
जाबालिसूत्राणि	४६	निशाचारः	६९
ज्ञानगर्भस्तोत्रम्	४६	निशाटनम्	६९
ज्ञानतिलकः	४७	निःश्वासागमः	७०
ज्ञानदीपविमर्शिनी	४७	निःश्वासोत्तरम्	७२
ज्ञानसंबोधः	४७	नैश्वासतन्त्रम्	७३
ज्ञानामृतरसायनम्	४८	पञ्चरात्रोपनिषत्	७३
ज्ञानेन्दुकौमुदी	४९	पञ्चरात्रश्रुतिः	७३
तत्त्वगर्भस्तोत्रम्	४९	पञ्चशतिकम्	७३
तत्त्वयुक्तिः	५०	पद्मवाहिनी	७६
तत्त्वरक्षाविधानम्	५०	परमार्थसंग्रहः	७८
तत्त्वविचारः	५०	पराख्यसंहिता	७८
तत्त्वविमर्शिनी	५०	परापञ्चाशिका	८०
तत्त्वार्थचिन्तामणिः	५१	परास्तोत्रम्	८१
तन्त्रम्	५१	पर्यन्तपञ्चाशिका	८२
तन्त्रराजः	५१	पादुकोदयः	८३
तन्त्रसद्भावः	५२	पूजारहस्यम्	८५
तपस्वी	५२	पौष्करागमः	८५
तिमिरोद्घाटः	५६	प्रबोधपञ्चदशिका	९१
त्रिकसारः	५६	प्रभाकौलम्	९१
त्रिकहृदयम्	५७	प्रमाणस्तुतिः	९२
त्रिविक्रमः	५७	बौद्धायनसंहिता	९२
त्रिशिरोमतम्	५७	ब्रह्मयामलम्	९३
देविकाक्रमः	६४	भर्गशिखा	९५
देवीकालोत्तरम्	६४	भैरवकुलम्	९६
देव्यामतसूत्रम्	६५	भैरवयामलम्	९७
द्वयसंपत्तिः	६५	भोगमोक्षप्रदीपिका	९८
धातुसमीक्षा	६६	मतङ्गसूत्रम्	९८
नन्दिशिखा	६६	मतदेवः	१०२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मनोऽनुशासनस्तोत्रम् १०३
महानयपद्धतिः १०३
महाम्नायः १०३
महाबलः १०४
महार्थोदयः १०४
महास्वच्छन्दः १०४
महास्वच्छन्दसंग्रहः १०४
मातृकाहृदयम् १०५
मानसोल्लासः १०६
मायावामनसंहिता १०७
मालिनीमतम् १०७
मुकुटतन्त्रम् १०८
मुख्याम्नायरहस्यविधिः १०८
मोक्षोपायः १०८
योगपादः (मतङ्गसूत्रीयः) १०९
योगसंचरः १०९
योगिनाथः ११२
रत्नत्रयम् ११३
रत्नमाला ११३
रसान्वयः ११५
रहस्यशास्त्रम् ११५
रहस्यसिद्धिसोपानम् ११६
रहस्यस्तोत्रम् ११७
रुद्ररहस्यम् ११८
रौरवागमः ११८
लक्ष्मीकौलार्णवः ११९
लघुबृंहणी ११९
वाजसनेयतन्त्रम् १२०
वातुलोत्तरम् १२०
वायवीयसंहिता १२१
वार्त्तिककारः १२२
वासुदेवः १२२
विज्ञानेन्दुकौमुदी १२२
विद्याधिपतिः १२३
विमर्शदीपिका १२३
विवेकमार्तण्डः १२४
विश्वसंहिता १२४
विश्वसारोत्तरसूत्रम् १२४
विषयपञ्चिका १२५
विष्णुयामलम् १२५
वीरयामलम् १२५
वीरावलिः १२६
वैहायसी(संहिता) १२७
शचीमतम् १२७
शम्भ्वैक्यदीपिका १२८
शाम्भवदीपिका १२८
शिवज्ञानबोधसंग्रहः १२९
शिवतत्त्वविलासः १२९
शिवधर्मः १२९
शिवधर्मोत्तरम् १३०
शैवतन्त्रम् १३०
श्रीकण्ठीयसंहिता १३१
श्रीपराक्रमः १३१
षट्सहस्रिका १३२
षड्धातुसमीक्षा १३३
षाड्गुण्यविवेकः १३३
संवित्प्रकाशः १३४
संवित्स्तोत्रम् १३७
संविदुल्लासः १३७
संकर्षणसूत्राणि १४०
संकेतपद्धतिः १४१
सत्कार्यसिद्धिः १४३
समाधिपञ्चदशी १४३
सम्बन्धसिद्धिः १४३
सर्वज्ञभैरवः १४४
सर्वज्ञानोत्तरम् १४४
सर्वमङ्गलाशास्त्रम् १४६
सर्ववीरः १४७
सर्वस्रोतःसंग्रहसारः १४८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वाचारः	१४८	सोमसिद्धान्तः	१५९
सात्त्वतसंहिता	१४८	सौभाग्यकाण्डम्	१६०
सारशास्त्रम्	१४९	सौभाग्यसुभगोदयः	१६१
सार्धशतिकम्	१४९	सौभाग्यहृदयस्तोत्रम्	१६५
सिद्धातन्त्रम्	१५०	स्तोत्रावली	१६६
सिद्धान्तदीपिका	१५०	स्वच्छन्दः	१६६
सिद्धान्तरहस्यसारः	१५१	स्वच्छन्दभैरवः	१६७
सिद्धान्तवचनम्	१५१	स्वच्छन्दसंग्रहः	१६७
सिद्धान्तसारावलिः	१५२	स्वतन्त्रतन्त्रम्	१८१
सिद्धामतम्	१५२	स्वबोधोदयमञ्जरी	१८२
सिद्धोक्तम्	१५३	स्वस्वभावसंबोधनम्	१८२
सुप्रभेदागमः	१५४	स्वात्मसंबोधः	१८२
सुभगोदयः	१५७	स्वायंभुवागमः	१८३
सुभगोदयः	१५८	हंसपारमेश्वरम्	१८६
सुभगोदयव्याख्या	१५९	हंसभेदः	१८७
सोमराजः	१५९	हस्तनयः	१८८
श्लोकार्धानुक्रमणी			१८९
संकेतसूची			२२६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लुप्तागमसंग्रहः

(प्रथमो भागः)

अचिन्त्यागमः

(१)

[1]चतुर्विंशतिसंख्यातमशुद्धं भोग्यकाण्डकम् ।
ततो हि मिश्रतत्त्वं च भोक्तृकाण्डं तु सप्तकम् ॥
प्रेरकं शुद्धतत्त्वं च स्वतन्त्रं तच्छिवस्य तु ।

(२)

[2]जायेते पुण्यपापौ तौ मनोवाक्कायकर्मभिः ।
तन्मनःकर्म चेत्याहुः पुंसश्चित्तापराधतः ॥ ५
सत्यज्ञानोपदेशश्च प्रियमप्रियमन्यतः ।
अनित्यमज्ञानरतमेतद् वाक्कर्म चोच्यते ॥
दानाहिंसापरश्चैव हिंसाचर्यासुरावशः ।
विषये सक्तिरित्यादि कायिकं समुदाहृतम् ॥

(३)

[3]शास्त्रजालानि नादान्तं पाशज्ञानं वरानने । १०
पशुज्ञानमिति प्रोक्तं ह्यहं ब्रह्माभिमानतः ॥
शिववस्तुपरं तस्मान्मन्त्रातीतो निरञ्जनः ।
सर्वज्ञः सर्वगः शान्तः सर्वात्मा सर्वतोमुखः ॥

(४)

[4]अन्यथा बहुमुक्त्युक्तिः शास्त्रे चैव वरानने ।
शिवत्वसुलभा मुक्तिरिदानीं कथ्यते मया ॥ १५

---

१. श० र० सं० पृ० ५३ । २. श० र० सं० पृ० ५६ ।
३. श० र० सं० पृ० ७६ । ४. श० र० सं० पृ० ८५ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अद्वयोल्लासः

[1]भ्रमः संसारो यत् कथमिव भवेन्मुक्तिरमुत-
स्त्वितीयं या वाञ्छा बत जडधियां सा प्रसरति ।
त्वदन्यन्नास्तीति प्रभवदविकल्पाद्वयमतेः
स्थिरीकारो मोक्षो द्वितयघटना संसृतिरतः ॥

अनन्तविजयागमः

[2]उत्तानं तु करं कृत्वा तिस्रोऽङ्गुल्यः प्रसारयेत् । २०
मध्यमाङ्गुष्ठकौ लग्नौ चालयेत मुहुर्मुहुः ॥
नाराचः कीर्तितो ह्येवम्..... ।

अनिरुद्धः

[3]श्रीमताऽप्यनिरुद्धेन शक्तिमुन्मीलिनीं विभोः ॥
व्याचक्षाणेन मातङ्गे वर्णिता निरपेक्षता ।
स्थावरान्तेऽपि देवस्य स्वरूपोन्मीलनात्मिका ॥ २५
शक्तिः पतन्ती सापेक्षा न क्वापीति सुविस्तरात् ।

---

१. म० म० पृ० २५–२६ ।

२. त० आ० वि० ४।२५१, पृ० २८१ ।

३. त० आ० वि० १३।२९३-९५; पृ० १७८–७९ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनुत्तरभट्टारकः

[1]मृतचेष्टस्य पिण्डस्य न किञ्चिदुपलभ्यते ।
सुखं दुःखं न चैवास्ति परमानन्दभावनात् ॥
जिज्ञासारहितं स्थानं यत्र देवो निरञ्जनः ।
अकालकलनाहेतुर्गमागमविवर्जितः ॥ ३०
निरालम्बो निरुत्साहः शून्यभूतः शिवः स्वयम् ।
संज्ञानाशेन निर्जीवसंज्ञा सा व्योमरूपिणी ॥
(तथा तत्रैव देवीं प्रति वचनान्तरम्)—
विचरामि न चैकाकी कदाचिच्छून्यरूपता ।
सर्वः सर्वमयश्चाहं तद्रमेऽहं त्वया सह ॥
कदाचिदीदृशं विश्वं दृश्यमेतदितीरितम् । ३५

अनुत्तराष्टकम्

[2]मा किञ्चित् त्यज मा गृहाण

अनुप्रत्यभिज्ञा

[3]नाथ त्वया विना बिम्बं स्वच्छे स्वात्मनि दर्शितम् ।
प्रसेना दर्पणेनैव प्रभावाद् भावमण्डलम् ॥

---

१. वि० भै० वि०, श्लो० १३८ ।
२. त० आ० वि० ५ । ७४; पृ० ३८३ ।
३. त० आ० वि० ३ । ६४; पृ० ७३ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(५)

[1]यत्सृष्टिस्थितिसंहाररक्तैश्च यममृत्युभिः । ६५
रुद्रमार्तण्डपरमादित्यकालाग्निरुद्रकैः ॥
पदैश्च समहाकालैः कालीशब्दान्तयोजितैः ।
महाभैरवचण्डोग्रघोरकालीपदं नयेत् ॥

आगमरहस्यम्

(१)

[2]साक्षाद् भवान् यदि विधाय न मूर्तिमाद्यां
तत्त्वं निजं तदवदिश्यदतोऽतिगुह्यम् । ७०
नाज्ञास्यत त्रिभुवनं ध्रुवमन्धमूक-
कल्पं समस्तमसमञ्जसतामयास्यत् ॥

(२)

[3]येऽपीश्वरं व्यपदिशन्ति निमित्तहेतुं
तैरर्पितः स्थलजलाञ्जलिरीशितायै ।
अन्याङ्गनोपगमनेन वशीकृतस्य ७५
कामीश्वरस्थितिममी बत सङ्गिरन्ते ॥

(३)

[4]आकारवर्ग उपरि प्रतिभासतेऽस्य
ज्ञानस्य साऽपि तव विश्वमयी विभूतिः ।
विश्वात्मकस्त्वमिति नागमसिद्धमेतत्
किन्तु स्वसंविदितरूपतयाऽपि सिद्धम् ॥ ८०

---

१. त० आ० वि० ४।१७३; पृ० १९१ ।
२. स्प० प्र०, पृ० ३ ।
३. स्प० प्र०, पृ० २३ ।
४. स्प० प्र०, पृ० ३६ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आचारप्रकरणम्

[1]न ध्यानं न जपः पूजा न होमो नैव साधनम् ।
अग्निकार्याधिकारश्च नैतस्याऽस्ति महेश्वरः ॥

आज्ञावतारः

[2]स्वेच्छयैव जगत्सर्वं निगिरत्युद्गिरत्यपि ।

आत्मसंबोधः

[3]भवेद्भवानामभवाय नूनं स्वभावसंविद्विदितैव पुंसाम् ।
अमर्त्यतां मर्त्यजने करोति सकृत् सुधाप्राशनमात्रमेव ॥ ८५

आत्मसप्ततिः

(१)

[4]वस्तुस्थित्या न बन्धोऽस्ति तदभावान्न मुक्तता ।
विकल्पघटितावेतावुभावपि न किञ्चन ॥

(२)

[5]यद्यद्वस्तु स्वभावेन ज्ञानेन विषयीकृतम् ।
तद्वत्तादात्म्यमायाति जीवः सर्वमयो ह्यतः ॥

(३)

[6]यदिदं दृश्यते किञ्चिद् दर्शनात्तन्न भिद्यते । ९०
दर्शनं द्रष्टृतो नान्यद् द्रष्टैव हि ततो जगत् ॥

---

१. ज्ञ० र० सं०, पृ० ८६ । २. यो० दी०, पृ० १५, ९४, २६४, ३०७ ।
३. स्प० प्र०, पृ० ४२ । ४. स्प० प्र०, पृ० ८ ।
५. स्प० प्र०, पृ० ३६ । ६. स्प० प्र०, पृ० ३९ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आनन्दभैरवः

[1]उत्सृज्य लौकिकाचारमद्वैतं मुक्तिदं श्रयेत् ।
स समं सर्वदेवानां तथा वर्णाश्रमादिके ॥
द्रव्याणां समतादर्शी स मुक्तः सर्वबन्धनैः ।

आलोकमाला

[2]विरुद्धत्वात्तमोवृत्तेर्नावकाशं ददाति या । ९५
साऽवस्था काप्यविज्ञेया मादृशा शून्यतोच्यते ॥
न पुनर्लोकरूढ्यैव नास्तिक्यार्थानुपातिनी ।

इष्टोपदेशः

[3]यदिदं दृश्यते दृष्ट्या ग्रहं पुत्रांश्च सन्त्यज ।
येन पश्यति तं पश्य यं दृष्ट्वा पश्यसेऽखिलम् ॥

उच्छुष्मभैरवः

[4]यावन्न वेदका एते तावद्वेद्याः कथं प्रिये । १००
वेदकं वेद्यमेकं तु तत्त्वं नास्त्यशुचिस्ततः ॥

उत्तरपदम्

[5]व्योमाम्बुजे सहस्रारे सितकेसरसंकुले ।
तत्रासीनं महादेवमपृच्छत् कुलनायिका ॥

---

१. शि० वि०, पृ० १०७ । २. स्प० प्र०, पृ० १८ ।
३. स्प० प्र०, पृ० २३ । ४. शि० वि०, पृ० ८ ।
५. यो० दी०, पृ० २७१ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उद्धारोर्ध्वतन्त्रम्

[1]चन्द्रः शक्तिर्महाशक्तिर्ब्रह्माणी कामिकादिकम् ।

उपचारोपनिषत्

[2]बहिरपि गन्धपुष्पधूपदीपनैवेद्यानि पृथिव्याकाशवायुतेजस्सलिल- १०५
भावनया देव्यै समर्पयेत् ।

उपायविंशतिः

[3]स्थूलं स्थूलं परित्यज्य सूक्ष्मं सूक्ष्मं समाश्रयेत् ।
पश्चात् सूक्ष्ममपि त्यक्त्वा केवलं चिन्मयो भवेत् ॥

ऊर्मिकौलसिद्धसन्तानशास्त्रम्

(१)

[4]शून्यं न किञ्चित्तच्छून्यं त्वशून्यं शून्यता नहि ।
यदकिञ्चित् कथं तद्धि न किञ्चिच्छेत्तुमर्हति ॥ ११०

(२)

[5]आत्मा शून्य इह ज्ञेयः शिवधर्मैर्विना कृतः ।
शिवशून्योऽधिगन्तव्यो विमलोऽमूर्तविग्रहः ॥

(३)

[6]नास्त्यस्ति नास्ति नास्तीति कोटयो न स्पृशन्ति हि ।
वाचामगोचरं यस्मात् तत्तत्त्वमिह कथ्यते ॥

---

१. यो० दी०, पृ० २८ । २. यो० दी०; पृ० २७२ ।
३. म० प०, पृ० १४८ । ४. त० आ० वि० २।४८; पृ० ३९ ।
५. त० आ० वि० २।४८; पृ० ३९ । ६. त० आ० वि० २।४८; पृ० ४०।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्भावि न तद्भावि यद्भावि न तदन्यथा । ११५
एवं विचिन्त्य मतिमान् विकल्पं न समाश्रयेत् ॥
तच्च सर्वगतं सूक्ष्ममुपाधिपरिवर्जितम् ।

ऋजुविमर्शिनी

(१)

[1]पूजा विश्वस्य वेद्यस्य चिद्भूमिविश्रान्तिः ।

(२)

[2]एतच्चास्मत्परमगुरुकर्तृके श्रीमदृजुविमर्शिन्यादौ विमर्शनीयम् ।

(३)

[3]मातृकां परवागात्मानाहतभट्टारकपरमशिवस्वरूपां षट्त्रिंश- १२०
त्तत्त्वप्रसरणहेतुभूतां संविदमित्यर्थः ।

(४)

[4]चतुष्पीठाधिष्ठातृमहासंविदालम्बनेन प्रवृत्तचतुःस्रोतोरूपा महापदवी चतुराम्नाय । तस्याः कोशभूता महाधिष्ठात्री शेवधिस्ताम् ।

(५)

[5]इह हि विद्यायां त्रिष्वपि बीजेष्वन्तस्थातृतीयमस्ति, सम्प्रदायस्य काश्मीरोद्भूतत्वात्, प्राकृतभाषाविशेषत्वाच्च; यथासम्प्रदायं व्यवहार १२५
इत्युपदेशः ।

---

१. म० प०, पृ० ११२ ।
२. म० प०, पृ० १२३ ।
३. म० प०, पृ० १२९ ।
४. म० प०, पृ० १७८ ।
५. म० प०, पृ० १९३ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कक्ष्यास्तोत्रम्

(१)

[1]त्वदाशयोन्मेषनिमेषमात्रमयौ जगत्सर्गलयावितीदृक् ।
स्फुटे स्फुटं त्वन्महिमावभाति विचित्रनिर्माणनिदर्शनेव ॥
ज्ञानक्रियादिगर्भेच्छाशक्तिर्यः प्रसरात्मकः ।
संकल्पोक्तः स उन्मेषः प्रोक्तं ह्येतत् स्वतन्त्रके ॥ १३०
यत्र यत्र भवेदिच्छा ज्ञानं तत्र प्रवर्तते ।
क्रियाकरणसंयोगात् पदार्थस्योदयो भवेत् ॥

(२)

[2]ज्ञानं प्रशान्तं तव बोधवृत्तिरैश्वर्यमुद्यत्प्रसरा परेषाम् ।
प्रकाशनं प्रत्यपि योग्यरूपा शक्तिर्बहिः स्थैर्यवती बलं सा ॥
उत्पन्नबाह्यप्रसरां तु वीर्यं तेजश्च बाह्यानवभासयन्ति । १३५
षोढेत्थमेकैव तव स्वशक्तिर्बाह्यावमर्शात्तु भवेदविद्या ॥
तत्र सर्वज्ञता ज्ञानं सर्वं हि जायते ततः ।

(३)

[3]सर्वाः शक्तीश्चेतसा दर्शनाद्याः
स्वे स्वे वेद्ये यौगपद्येन विष्वक् ।
क्षिप्त्वा मध्ये हाटकस्तम्भभूत- १४०
स्तिष्ठन् विश्वाधार एकोऽवभासि ॥

कर्मकाण्डक्रमावली

[4]त्रयीसप्तचतुर्युग्ममये त्रितयवर्त्मनि ।
स्थितो यः शक्तिसहितः स जयत्यमृतेश्वरः ॥

---

१. स्प० प्र०, पृ० १० । २. स्प० प्र०, पृ० २६० ।
३. प्र० हृ०, सू० १८ । ४. वि० भै० वि०, श्लो० ५७ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(भट्ट) कल्लटः

(१)

[1]स्वोद्यन्तृतः स्वरूपस्पन्दोल्लासेन चोदितश्च यदा ।
परवश इव प्रवृत्तस्तदा न गर्वान्मयेयमारब्धा ॥ १४५

(२)

[2]गुणैरुपेताऽपि तु सिद्धविद्या कन्येव दत्ता गुणवर्जिताय ।
सम्भोगहीना विदधात्यकीर्तिं दातुर्यतस्तत्प्रगुणाय दद्यात् ॥

कामसिद्धिस्तोत्रम् (वत्सराजकृतम्)

[3]लोकाश्चतुर्दश महेन्द्रमुखाश्च देवाः
मूर्तित्रयं मुनिगणाश्च वशिष्ठमुख्याः ।
सद्यो भवन्ति न भवन्ति समस्तमूर्ते- १५०
रुन्मीलनेन तव देवि निमीलनेन ॥

कामिकः

(१)

[4]निधनेशात् स्वयंभूतं त्रिकोट्यर्धेन सम्मितम् ।
निधनेशात् स्वयंभूतं श्रुतवान् नलिनोद्भवः ॥

(२)

[5]लौकिकं वैदिकं चैव तथाध्यात्मिकमेव च ।
अतिमार्गं च मन्त्राख्यं तन्त्रभेदमनेकधा ॥ १५५

---

१. स्प० प्र०, पृ० २ । २. स्प० प्र०, पृ० ५४ ।
३. सौ० ल० अ०, पृ० २२१ । ४. श० र० सं०, पृ० ३ ।
५. श० र० सं०, पृ० ८ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सद्योवाममहाघोरपुरुषेशानमूर्तयः ।
प्रत्येकं पञ्चवक्त्राः स्युस्तैरुक्तं लौकिकादिकम् ॥
पञ्चविंशतिभेदेन स्रोतोभेदः प्रकीर्तितः ।
एष्वेवान्तर्गतं वस्तु वाङ्मयं वस्तुवाचकम् ॥

(३)

[1]तथैव मन्त्रतन्त्राख्यं सदाशिवमुखोद्भवम् । १६०
सिद्धान्तं गारुडं वामं भूततन्त्रञ्च भैरवम् ॥
ऊर्ध्वपूर्वकुबेराप्ययाम्यवक्त्राद् यथाक्रमम् ।
सामान्यं च विशेषं च शैवं वैशिष्टिकं वचः ॥

(४)

[2]आदावभूद् द्विधा ज्ञानमधिकारिविभेदतः ।
परापरेण भेदेन पतिपश्वर्थदर्शकम् ॥ १६५
शिवप्रकाशकं ज्ञानं शिवज्ञानं परं स्मृतम् ।
वेदाद्यपरविज्ञानं पशुपाशार्थदर्शकम् ॥
यथा विलक्षणं चक्षुः क्षपायां श्वविड़ालयोः ।
तथा विलक्षणं ज्ञानमेवमेतत् परापरम् ॥

कालपरा

(१)

[3]शब्दो नादात्मकस्तस्मात् प्रत्ययेनोपबृंहितः । १७०
मन्त्रबोधस्वरूपस्थमभिन्नो बोधयत्यपि ॥

---

१. श० र० सं०, पृ० ९ ।
२. श० र० सं०, पृ० ९ ।
३. स्प० प्र०, पृ० ३३ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]पराक्षरतरोर्धातुर्नानाशक्तेर्विवर्तगाः ।
शक्तयो वर्णदेहेषु वक्त्राद्वर्णत्वमागताः ॥

कालिकाक्रमः

(१)

[2]तत्तद्रूपतया ज्ञानं बहिरन्तः प्रकाशते ।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत् ॥ १७५
नहि ज्ञानादृते भावाः केनचिद्विषयीकृताः ।
ज्ञानं तदात्मतां यातमेतस्मादवसीयते ॥

(२)

[3]तस्मान्नित्यमसंदिग्धं बुद्ध्वा योगं गुरोर्मुखात् ।
अविकल्पेन भावेन भावयेत्तन्मयत्वतः ॥
यावत्तत्समतां याति भगवान् भैरवोऽब्रवीत् । १८०

(३)

[4]तस्य देवातिदेवस्य परबोधस्वरूपिणः ।
विमर्शः परमा शक्तिः सर्वज्ञा ज्ञानशालिनी ॥

(४)

[5]अस्तिनास्तिविभागेन निषेधविधियोगतः ।
ज्ञानात्मता ज्ञेयनिष्ठा भावानां भावनाबलात् ॥
युगपद् वेदनाज्ज्ञानज्ञेययोरेकरूपता । १८५

---

१. स्प० प्र०, पृ० ३४ ।
२. त० आ० वि० ५ । ८०, पृ० ३९०; शि० वि०, पृ० ११९ ।
३. शि० वि०, पृ० १११ ।
४. शि० वि०, पृ० ९१३ ।
५. शि० वि०, पृ० ११८ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(५)

[1]अस्तिनास्तिविभागेन ..... ।
सर्वं शुद्धं निरालम्बं ज्ञानं स्वप्रत्ययात्मकम् ।
यः पश्यति स मुक्तात्मा जीवन्नेव न संशयः ॥

(६)

[2]नाशेऽविद्याप्रपञ्चस्य स्वभावो न विनश्यति ।
उत्पत्तिध्वंसविरहात् तस्मान्नाशो न वास्तवः ॥ १९०
यतोऽविद्या समुत्पत्तिध्वंसाभ्यामुपचर्यते ।
यत् स्वभावेन नष्टं न तन्नष्टं कथमुच्यते ॥

(७)

[3]सुखदुःखादिविज्ञानविकल्पानल्पकल्पितम् ।
भित्वाऽद्वैतमहामोहं योगी योगफलं लभेत् ॥

(८)

[4]यदविद्यावृततया विकल्पविधियोगतः । १९५
शिवादीन्नैव झटिति समुद्भावयतेऽखिलान् ॥
ततः शुभाशुभा भावा लक्ष्यन्ते तद्वशत्वतः ।
अशुभेभ्यश्च भावेभ्यः परं दुःखं प्रजायते ॥

(९)

[5]अतथ्यां कल्पनां कृत्वा पच्यन्ते नरकादिषु ।
स्वोत्थैर्दोषैश्च दह्यन्ते वेणवो वह्निना यथा ॥ २००

---

१. शि० वि०, पृ० ११९ ।
२. शि० वि०, पृ० १२० ।
३. शि० वि०, पृ० १२३ ।
४. शि० वि०, पृ० १२३,१३२ ।
५. शि० वि०, पृ० १३२ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मायामयैः सदा भावैरविद्यां परिभुञ्जते ।
मायामयीं तनुं यान्ति ते जनाः क्लेशभाजनम् ॥

(१०)

[1]यथा स्वप्नानुभूतार्थान् प्रबुद्धो नैव पश्यति ।
तथा भावनया योगी संसारं नैव पश्यति ॥

(११)

[2]निरस्य सदसद्वृत्तीः संश्रित्य पदमान्तरम् । २०५
विहाय कल्पनाजालमद्वैतेन परापरम् ॥
यः स्वात्मनिरतो नित्यं कालग्रासैकतत्परः ।
कैवल्यपदभाग् योगी स निर्वाणपदं लभेत् ॥

कालिकामतम्

[3]पतन्ति जन्तवो येन कर्मणा नरके ध्रुवम् ।
उत्पतन्ति च तेनैव त्रिकालज्ञा भवन्ति च ॥ २१०

कालोत्तरसूत्रम्

(१)

[4]पञ्चत्रिंशतितत्त्वं हि शिवतत्त्वाद् विनिर्गतम् ।
तत्र स्थितिश्च वृद्धिश्च तत्रैव च लयो भवेत् ॥

(२)

[5]विश्वस्याऽनेकरूपस्य ज्ञानमेकं शिवात्मकम् ।
व्यापकं विमलं शान्तं भुक्तिमुक्तीति येन तत् ॥

---

१. शि० वि०, पृ० १३३ । २. शि० वि०, पृ० १३३-३४ ।
३. म० प०, पृ० २३ । ४. श० र० सं०, पृ० ४२ ।
५. श० र० सं०, पृ० ७४ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किरणागमः

(१)

[1]निष्कलः किं न कल्योऽसौ यद्वा कल्यः कथं जगत् । २१५
यथाऽत्र कुरुते शक्त्या तथा शास्त्रं न किं प्रभुः ॥

(२)

[2]सृष्ट्यनन्तरमेवेशः शिवान् सृष्ट्वा दशात्मजान् ।
ज्ञानमेव विभज्यैकं तेषां तत्संख्ययाऽवदत् ॥
कामिकं प्रणवाख्यस्य सुधाख्यस्य तु योगजम् ।
दीप्ताख्यस्यापि चिन्त्यं तु कारणाख्यस्य कारणम् ॥ २२०
अजितं सुशिवाख्यस्य ईशस्यापि सुदीप्तकम् ।
सूक्ष्मं तु सूक्ष्मसंज्ञस्य कालस्यापि सहस्रकम् ॥
सुप्रभेदं गणेशस्य ह्यंशुसंज्ञस्य चांशुमान् ।
एवं प्राथमिकं प्रोक्तं पुनरन्यो गुरुक्रमः ॥
प्रणवात् त्रिकलः प्राप्तः कामिकं त्रिकलाद्धरः । २२५
सुधाख्याद् योगजं तन्त्रं भस्मसंज्ञस्ततः प्रभुः ॥
दीप्ताद् रुद्रात्तु चिन्त्यं च गोपतिश्च ततोऽम्बिका ।
कारणं कारणाच्छर्वस्ततः प्राप्तः प्रजापतिः ॥
अजितं सुशिवात् प्राप्त उमेशोऽप्यच्युतस्ततः ।
ईशाद् दीप्तं त्रिमूर्त्तिस्तु ततः प्राप्तो हुताशनः ॥ २३०
सूक्ष्मं सूक्ष्माद् भवः प्राप्तस्तस्मात् प्राप्तः प्रभञ्जनः ।
कालसंज्ञात् सहस्राख्यं भीमो धर्मस्ततः खगः ॥
गणेशात् सुप्रभेदाख्यं त्वविघ्नेशस्ततः शशी ।
अंशुमच्चांशुसंज्ञात् तु प्राप्तो ह्यग्रस्ततो रविः ॥

---

१. श० र० सं०, पृ० ८ । २. श० र० सं० पृ० १०–१२ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवमेते शिवाः ख्याताः शिवभेदा दशाद्यके । २३५
दशाष्टसंख्ययाऽप्यन्यो रुद्रभेदः परो मतः ॥
दशाष्टसंख्यया रुद्रान् पूर्वमुत्पाद्य बुद्धिमान् ।
शिवस्तत्संख्ययैवेह पुनस्तान् बोधयत् खगः ॥
रुद्रस्यानादिसंज्ञस्य विजयं तन्त्रमुत्तमम् ।
पारमेशं महातन्त्रं श्रीरूपस्य प्रभाषितम् ॥ २४०
निश्वासं यद् दशार्णस्य प्रोद्गीतं नाम शूलिनः ।
मुखबिम्बं प्रशान्तस्य बिन्दोः सिद्धमतो मतम् ॥
शिवनिष्ठस्य सन्तानं सिंहं सोमस्य चोदितम् ।
चन्द्रहासमनन्तस्य भद्रं सर्वात्मनो मतम् ॥
निधनस्य स्वयम्भूतं विरजं तेजसः स्मृतम् । २४५
कौरव्यं ब्रह्मणेशस्य शिवाख्यस्य च माकुटम् ॥
किरणं देवपितुः ख्यातं ललितं चालयस्य तु ।
आग्नेयं यच्च तद् व्योम्नः शिवस्यापि पुनः परम् ॥
एते जाताः सह ज्ञाने शिवदेहात् पुनः शृणु ।
प्राप्तश्चानादिसंज्ञात्तु विजयं परमेश्वरः ॥ २५०
श्रीरूपात् पारमेशं तु प्राप्तोऽस्मादुशना मुनिः ।
दशाक्षराच्च निश्वासं संप्राप्ता शैलसम्भवा ॥
प्रोद्गीतं रुद्रसंज्ञात् तु कचाख्यो मुनिसत्तमः ।
प्रशान्तो मुखबिम्बं तु दधीचिर्नाम यो मुनिः ॥
बिन्दुसंज्ञाच्च यत् सिद्धं प्राप्तश्चण्डेश्वरो गणः । २५५
शिवनिष्ठाच्च सन्तानं संप्राप्तो हंसवाहनः ॥
नारसिंहं तु यत् सौम्यान् नृसिंहः प्राप्तवान् महान् ।
अनन्ताच्चन्द्रहासं तु प्राप्तो देवपुरोहितः ॥
भद्रं सर्वात्मदेवात्तु वीरभद्रो महागणः ।
स्वायम्भुवं तु निधनात् संप्राप्तः पद्मसंभवः ॥ २६०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विरजं तेजसः प्राप्तः प्रजारक्षणतत्परः ।
कौरव्यं ब्रह्मणेशात्तु सम्प्राप्तो नन्दिकेश्वरः ॥
ईशानाद् मुकुटं प्राप्तो महादेवो ध्वजाश्रयः ।
किरणं देवपितृतः प्राप्तः संवर्तको मुनिः ॥
आलयाल्लिंगं प्राप्तो रुद्रो भैरवरूपवान् । २६५
आग्नेयं व्योमसंज्ञात्तु सम्प्राप्तो हुतभुक् पुनः ॥
तन्त्रभेदो मया प्रोक्तश्चात्र संक्षिप्तलक्षणः ।
येषु भेदेषु यो भेद उपभेदः स उच्यते ॥
भेदोऽयमुपचारेण कल्पितः स यतस्ततः ।
फलभेदो न कल्प्योऽत्र ज्ञानभेदः प्रकल्प्यते ॥ २७०

(३)

[1]अनुष्टुप्छन्दसा पूर्वं निबद्धं बहुकोटिभिः ।
सदाशिवेन देवेन ततोऽनन्तेन धीमता ॥

(४)

[2]प्रोक्तः स निष्कलः स्थूलस्तथा सकलनिष्कलः ।
ईशः सदाशिवः शान्त इति नाम्ना स्थितस्त्विह ॥
इच्छानुग्रहकर्तृत्वाल्लयभोगाधिकारवान् । २७५
त्रिविधः कृत्यभेदेन कथितो नामभेदतः ॥

(५)

[3]शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।

(६)

[4]प्रकाशो व्यक्तिशब्देन मलशब्देन चावृतिः ।
व्यक्तिर्यौऽणोर्मलः प्रोक्तः स्फुटं दीपान्धकारवत् ॥

---

१. श० र० सं०, पृ० १२ । २. श० र० सं०, पृ० २३ ।
३. श० र० सं०, पृ० २५, ५० । ४. श० र० सं०, पृ० ३८ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(७)

[1]गुरुर्यथाऽग्रतः शिष्यान् सुप्तान् दण्डेन बोधयेत् । २८०
शिवेऽपि मोहनिद्रायां सुप्तांश्छक्त्या प्रबोधयेत् ॥

(८)

[2]अनादिमलमुक्तत्वात् सर्वज्ञोऽसौ ततः शिवः ।

(९)

[3]विषसंबन्धिनी शक्तिर्यथा मन्त्रैर्निरुद्ध्यते ।
तदा न तद्विषं क्षीणमेवं पुंसो मलक्षयः ॥

(१०)

[4]शिवतत्त्वं कथं शून्यं तच्छून्यं नाक्षगोचरः । २८५
प्रत्यक्षं चाक्षविज्ञानं तदतीतं न किञ्चन ॥

(११)

[5]माया हेया शिवो ग्राह्यो ग्राहकः पुरुषः स्मृतः ।
मायाधर्मः शिवः शून्यः..... ॥

(१२)

[6]अतीन्द्रियं च यद्वस्तु तत्राण्डानुभवो न किम् ।
अनुभावो मनोऽध्यक्षः प्रसिद्धः क्षुद्यथा च तृट् ॥ २९०

---

१. श० र० सं०, पृ० ७२ ।
२. श० र० सं०, पृ० ७६ ।
३. श० र० सं०, पृ० ८९ ।
४. त० आ० वि० १ । ७५; पृ० ११६ ।
५. त० आ० वि० १ । ७५; पृ० ११६ ।
६. त० आ० वि० १ । ७५; पृ० ११६ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(१३)

[1]अनुभावो विकल्पोत्थो विकल्पो मानसः स च ।
समनस्कं च तज्ज्ञेयमनस्कमरूपकम् ॥
अज्ञात्वा दैशिकस्तत्त्वं कथं दीक्षां करोत्यसौ ।
ज्ञेयः सर्वात्मनैवार्थः स ज्ञेयो नैव सर्वथा ॥

(१४)

[2]संकल्पकमत्र मनः..... । २९५

(१५)

[3]क्षुधाद्यनुभवो यत्र विकल्पस्तत्र नो भवेत् ।
वस्त्वाश्रयो विकल्पोऽपि तद्वस्तु घटवन्न च ॥
विकल्पो मानसः सूक्ष्मः शून्यशक्तिलयं गतः ।
तद्गतस्त्वन्यविच्छिन्नस्तेनासौ वित्तवर्जितः ॥
ज्ञानं चात्मेन्द्रियाश्लेषात् कर्ता ह्यात्मा मनः क्रिया । ३००
शिवः साध्योऽत्र मन्तव्यो विभुरप्येकधर्मतः ॥

(१६)

[4]प्रत्यक्षेण यथा वृक्षो रूपमात्राद् विगृह्यते ।
रसादयो गृहीता नो तथेशो ज्ञानशक्तितः ॥
गृह्यते तत्त्वभावेन वस्तुभावविवर्जनात् ।

(१७)

[5]बिन्दुर्नादस्तथा शक्तिः शून्यत्वे परिकल्पिताः । ३०५
चेतसः स्थितिहेत्वर्थं पुनर्नित्यं स्थिरं भवेत् ॥

---

१. त० आ० वि० १ । ७५; पृ० ११७
२. त० आ० वि० १ । ७५; पृ० ११७
३. त० आ० वि० १ । ७६; पृ० ११९
४. त० आ० वि० १ । ७७; पृ० १२१
५. त० आ० वि० १ । ७७; पृ० १२१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अतीन्द्रियः सुसूक्ष्मत्वात् सूक्ष्मा शक्तिः स तद्गतः ।
ज्ञानशक्तिर्मता सापि तज्ज्ञानाज्ज्ञात एव सः ॥

(१८)

[1]शून्यमेवंविधं ज्ञेयं गुरुतः शास्त्रतः स्वतः ।

(१९)

[2]समे कर्मणि संजाते तत्कालं योग्यतावशात् । ३१०
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा ॥
सर्वज्ञः स शिवो यद्वत्किञ्चिज्ज्ञत्वविवर्जितः ।

कुब्जिकातन्त्रम्

(१)

[3]शिवस्य निष्प्रपञ्चस्य परमार्थशरीरिणः ।
चिदुल्लासात् परा जाता पञ्चानां मातृरूपिणी ॥
अन्वयानां मार्गयोगात् सैका षोढा प्रजायते । ३१५
परा चेच्छा तथा ज्ञाना क्रिया कुण्डलिनीति च ॥
मातृका चाष्टधा प्रोक्ता पराभेदास्ततः स्मृताः ।
कुण्डलिनीमातृकाभ्यां च षोढा भिन्नं मयूखकम् ॥
नानाविधं सुविततं तन्त्रमेतत् षडन्वयम् ।
उत्पन्नं शाम्भवं पश्चाज्जगदेतच्चराचरम् ॥ ३२०

---

१. त० आ० वि० ४ । ४१; पृ० ४६
२. त० आ० वि० १३ । २८३–८४; पृ० १७३
३. सौ० लो० सौभा० श्लो० १४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]आदौ परा चतुर्धा स्याद् द्वितीयेच्छा च पञ्चधा ।
तृतीया वेदधीज्ञाना चतुर्थी सप्तधा क्रिया ॥
पञ्चमी कुण्डलीद्विर्धिः षष्ठी स्यान्मातृकाष्टधा ।
परातोऽजायतेच्छा हि सा च व्योमपतिः स्मृता ॥
षट्त्रिंशन्नायिकाः प्रोक्ताः कण्ठस्थानसमाश्रिताः । ३२५
इच्छातो जायते ज्ञाना सा च वायोरधीश्वरा ॥
सप्तविंशतिरश्मीनां पतिः साऽनाहताश्रया ।
ज्ञानातोऽभूत्क्रिया व्यक्ता सा च वह्नीश्वरा मता ॥
एकत्रिंशद्रश्मिपतिः स्वाधिष्ठानं समाश्रिता ।
क्रियातः कुण्डली व्यक्ता सा स्यात् सलिलनायिका ॥ ३३०
सप्तविंशतिरश्मीनां मणिपूरं समाश्रिता ।
कुण्डल्या मातृका जाता सा क्षितेरीश्वरी मता ॥
अष्टाविंशतिरश्मीनामक्षीवाधारमाश्रिता ।
शिवशक्तिविभागेन द्विविधा शाम्भवाज्ञया ॥
षष्ट्युत्तरं तु त्रिशतमेवं शम्भुमरीचयः । ३३५
परादिशक्तिभिः षड्भिर्नायकैः सहिताः पुनः ॥
द्विसप्तत्यधिकं त्रीणि शतान्याहुर्मनीषिणः ।
एषां स्मरणमात्रेण जीवन्मुक्तो महीं चरेत् ॥
सर्वेषां स्मरणाशक्तः षट्सु चैकमपि स्मरेत् ।
एतेषां स्मृतितो लोकः पापहा पूजनात् पुनः ॥ ३४०
लक्ष्मीवान् ध्यानतो जीवन्मुक्तो रश्मिकुले वसेत् ।

(३)

[2]यल्लाभान्नापरो लाभो यत् सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं तद् ब्रह्मेत्यवधारय ॥

---

१. सौ० ल० सौभा०, श्लो० १४ । २. श्रीत० चि०, पृ० ८ ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्दृश्यान्नापरं दृश्यं यद्दृष्ट्वा न पुनर्भवः ।
तिर्यगूर्ध्वमधःपूर्णं सच्चिदानन्दमव्ययम् ॥ ३४५
अनन्तं नित्यमेकं यत्तद् ब्रह्मेत्यवधारय ।

कुब्जिकामतम्

(१)

[1]भोग्यभोक्तृषु भावेषु मिषत्स्वनिमिषत्सु च ।
देशकालदिगाख्येषु स्थूलसूक्ष्मपरेषु च ॥
सत्तास्फुरणकव्याप्ता गतिभक्षणयोगतः ।
कर्मणा चरणाख्येयं न तु पादतया प्रिये ॥ ३५०

(२)

[2]सितो वामेऽरुणो दक्षे वराभयकरो गुरुः ।
प्रेताम्बुजगतोऽङ्कस्थरक्तशक्तिस्त्रिलोचनः ॥
पञ्चमुण्डधरः स्रग्वी हृदि ध्येयः स्मिताननः ।

(३)

[3]कुण्डिकामतं घुटिकासिद्धिहेतुः । सोऽपि वामाचार-
प्रधान एव । ३५५

---

१. म० म० प०, पृ० ४
२. म० म० प०, पृ० ४
३. सौ० ल० लक्ष्मी०, पृ० १३९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुलगुह्वरः

(१)

[1]इदानीं कामतत्त्वं तु विषतत्त्वं परं तथा।
कथ्यते तव सुश्रोणि भक्तिस्नेहाद् विशेषतः॥

इत्युपक्रम्य—

यत्तदक्षरम्..... .... ।

इत्यादि चाभिधाय—

तत्र चित्तं नियुञ्जीत साधकेन महात्मना।
देवकिन्नरगन्धर्वसिद्धविद्याधराङ्गनाः॥ ३६०
यक्षकन्यास्तथा नाग्यः पिशाच्यः सुरयोषितः।
वशमायान्ति सुभगे नरनारीषु का कथा॥

(२)

[2]नास्योच्चारयिता कश्चित् प्रतिहन्ता न विद्यते।
स्वयमुच्चरते देवः प्राणिनामुरसि स्थितः॥

(३)

[3]नादाख्यं यत्परं बीजं सर्वभूतेष्वंवस्थितम्। ३६५

(४)

[4]सुसूक्ष्मो व्यापकः शुद्धः प्राणतत्त्वस्य वाचकः॥

(५)

[5]विसर्ग एव सुस्पष्टमाश्यानत्वमुपागतः।

---

१. रु० आ० वि० ३। १४७; पृ० १४८-१४९
२. त० आ० वि० ३। १४७; पृ० १४९
३. त० आ० वि० ३। १४७; पृ० १४९
४. त० आ० वि० ३। १४७; पृ० १४९
५. त० आ० वि० ३। १४७; पृ० १५०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(६)

[1]यत्तदक्षरमक्षोभ्यं प्रियाकण्ठोदितं परम् ।
सहजं नाद इत्युक्तं तत्त्वं नित्योदितो जपः ॥

(७)

[2]नित्यानन्दरसास्वादाद् हाहेति गलकोदरे । ३७०
स्वयंभूः सुखदोच्चारः कामतत्त्वस्य वेदकः ॥

(८)

[3]अतिसौख्यसमावेशविवशीकृतचेतसः ।
अविच्छिन्नं जपन्त्येनमङ्गनासङ्गमोत्सवे ॥
अत्रासक्तधियो यान्ति योगं योगीश्वराः परम् ।
स शिरोरहितः कामः कामिनीहृदयालयः ॥ ३७५
नेत्रारूढेन तेनाथ शक्तिदृष्टिं समाहरेत् ।
क्षोभयेन्नात्र संदेहो दृप्तामपि वरस्त्रियम् ॥

(९)

[4]यदा शून्यं निरालम्बं ध्यानधारणवर्जितम् ।
सर्ववर्णधरं शान्तं सर्ववर्णविवर्जितम् ॥
चिन्मात्रं केवलं शुद्धं विषनिर्वाहकारकम् । ३८०
न विषं न ग्रहः पापं न यक्षो न च राक्षसः ॥
न पिशाचादिकं किञ्चिन्नायं नाहं विभावयेत् ।
केवलं भावमात्रेण ..... ॥

—:०:—

१. त० आ० वि० ३ । १४७; पृ० १५१
२. त० आ० वि० ३ । १४७; पृ० १५१
३. त० आ० वि० ३ । १४७; पृ० १५१
४. त० आ० वि० ३ । १७३-१७४; पृ० १७३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुलचूडामणिः

[1]एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी ।
द्वावेतौ यस्य जायेते सोऽतिशान्तपदे स्थितः ॥ ३८५

—:०:—

कुलपञ्चाशिका

[2]अव्यक्तलिङ्गिनं दृष्ट्वा संभाषन्ते मरीचयः ।
लिङ्गिनं नोपसर्पन्ति अतिगुप्ततरा यतः ॥

—:०:—

कुलयुक्तिः

(१)

[3]प्राणिनां पतनं येन तेनैवोत्पतनं स्मृतम् ।
अज्ञस्तु बद्ध्यते येन ज्ञाता तेनैव मुच्यते ॥

(२)

[4]वेदान्ते वैष्णवे शैवे सौरे बौद्धेऽन्यतोऽपि च । ३९०
एक एव परः स्वात्मा ज्ञाता ज्ञेयं महेश्वरी ॥

(३)

[5]आत्मा चैवात्मना ज्ञातो यदा भवति साधकैः ।
तदा विस्मयमात्मा वै आत्मन्येव प्रपश्यति ॥

---

१. शि० वि०, पृ० ५८
२. शि० वि०, पृ० ११२
३. स्प० प्र०, पृ० ५
४. स्प० प्र०, पृ० ११.
५. शि० वि०, पृ० ३०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुलरत्नमाला

[1]यदा गुरुवरः सम्यक् कथयेत् तन्न संशयः ।
मुक्तस्तेनैव कालेन यन्त्रस्तिष्ठति केवलम् ॥ ३९५
किं पुनश्चैकतानस्तु परे ब्रह्मणि यः सुधीः ।
क्षणमात्रस्थितो योगी स मुक्तो मोचयेत् प्रजाः ॥

कुलसारः

[2]अहो तत्त्वस्य माहात्म्यं ज्ञातमात्रस्य सुन्दरि ।
श्रोत्रान्तरं तु संप्राप्ते तत्क्षणादेव मुच्यते ॥

कुलाम्नायः

[3]मेढ्रस्याधः कुलो ज्ञेयो मध्ये तु विषसंज्ञितः । ४००
मूले तु शाक्तः कथितो बिन्दुनादप्रवर्तकः ॥
अग्निसंज्ञस्ततश्चोर्ध्वमङ्गुलानां चतुष्टये ।
नाभ्यधः पवनाधारो नाभावेव घटाभिधः ॥

क्रमकेलिः

(१)

[4]अत एव ये निर्विमर्शं तुर्यातीतमिच्छन्ति, ते निरुपदेशा एव ।

---

१. शि० वि०, पृ० १३५
२. शि० वि०, पृ० १३६
३. वि० भै० वि०, श्लो० ६८
४. म० म० प०, पृ० १०६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]सेयमेवंविधा भगवती संविद्देव्येव मन्त्रः। ४०५

(३)

[2]तद्विवर्तः स्मृतो रश्मिपुञ्जश्चक्रेशिपूर्वकः।

(४)

[3]वामदक्षिणतन्त्रादिष्वप्येतन्मयमेव सर्वं निर्वहतीति मन्तव्यम्।

(५)

[4]यश्चायमेवंविधार्थमथनप्रगल्भो भगवान्, अत एव सर्वपर्यन्तप्रतिष्ठास्थानरूपो यः कुलेश्वरः, स एव यतः स्वशक्तिं ४१० निर्मथ्य सृष्ट्यादिकारी, अत एवंविधं श्रीमन्थानं भैरवं नमामीति संबन्धः।

(६)

[5]वन्दनं हि तदनुप्रवेशः।

क्रमवासना

(१)

[6]संवित्सतत्त्वनैर्मल्यसिद्धये शोषणादिकम्।
विकल्पसार्वभौमस्य शरीरस्याश्रयाम्यहम्॥ ४१५

---

१. म० म० प०, पृ० १२७
२. म० म० प०, पृ० १५६
३. म० म० प०, पृ० १७८
४. म० म० प०, पृ० १७९
५. म० म० प०, पृ० १९२
६. म० म० प०, पृ० ११५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]कारणात्मपरामृष्टकार्यभूताङ्गुलिस्थितिम् ।
करोमि चिन्मयीं शुद्धिं करयोः परिशोधनीम् ॥
सर्वज्ञत्वादिशक्तीनां सतीनामात्मनि प्रभौ ।
उन्मज्जनं भावयामि षडङ्गविधियोगतः ॥

क्रमसद्भावः

(१)

[2]षोडशातः समासेन शृणुष्वैकमना हर । ४२०
(इत्यादि)—
सा सत्ता लीयते यत्र काली द्व्यष्टकला स्मृता ॥

(२)

[3]इदं सर्वमसर्वं यत्संहारान्तं तु नित्यशः ।
कुटिलेक्षणरेखान्तग्रस्तमस्तमितं च यत् ॥
ततो बोधरसाविष्टा स्पन्दमाना निराकुला ।
दीधितीनां सहस्रं यद्वमेच्च पिबते भृशम् ॥ ४२५
सा कला लीयते यस्यां रुद्रकालीति सा स्मृता ।

(३)

[4]गमागमसुगम्यस्था महाबोधावलोकिनी ।
मायामलविनिर्मुक्ता विज्ञानामृतनन्दिनी ॥
सर्वलोकस्य कल्याणी रुद्रा रुद्रसुखप्रदा ।
यत्रैव शाम्यति कला रुद्रकालीति सा स्मृता ॥ ४३०
भेदस्य द्रावणाद् भद्रा भद्रसिद्धिकरीति या ।

---

१. म० म० प०, पृ० ११७
२. त० आ० वि० ४ । १२७; पृ० १३६
३. त० आ० वि० ४ । १७३; पृ० १९०
४. त० आ० वि० ४ । १५८; पृ० १७३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(४)

[1]कालोत्थिता महादेव सानन्दानन्दिनी शिवा ।
चिद्घना युग्ममध्यस्था अक्षराक्षरगोचरा ॥
अकुला कलयेन्नित्या कालकाली निराकुला ।
सा कला लीयते यस्यां सृष्टिकाली तु सा स्मृता ॥ ४३५

(इत्याद्युपक्रम्य)—

क्रमत्रयाणां यच्चक्रं घोरघोरतरं महत् ।
कालरूपं मरीच्याद्यं त्वाष्ट्रं कल्पान्तकान्तगम् ॥
आचरेत्तु महाचारचातुर्येणैव तत्र च ।
या कला घोरघोरोग्रा तस्याः सा तुर्यगा शिवा ॥
महाभैरवघोरस्य चण्डरूपस्य सर्वतः । ४४०
ग्रसते या महाकाली द्व्यष्टका कालनाशिनी ॥
सप्तादशी तु सा काली विद्धि सर्वार्थकारिणी ।

(५)

[2]स्नेपनीयानि नामानि चोरेभ्यो द्रविणं यथा ।
गोपनात् पालयन्त्येव मूर्तयस्तु महार्थतः ॥

(६)

[3]ज्ञानं सृष्टिं विजानीयात् स्थितिर्मन्त्रः प्रकीर्तितः । ४४५
संहारं तु महाकालमेलापं परमं विदुः ॥
अनाख्यं शक्तिरूपं तु भासाख्यं शम्भुरूपकम् ।
पञ्चप्रकारमेतद्धि विज्ञेयं तत्त्वदर्शिभिः ॥

---

१. त० आ० वि० ४ । १५८; पृ० १७३
२. म० म० प०, पृ० ८८
३. म० म० प०, पृ० ९७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(७)

[1]तया व्याप्तमिदं विश्वं त्रैलोक्यं सचराचरम् ।

(८)

[2]तेषां मध्यात् क्रमेणैव आदौ पूज्यस्तु कः क्रमः । ४५०
तन्मे कथय सुश्रोणि विस्तरेण यथाविधि ॥

(९)

[3]पुरा यत् कथितं देव पञ्चपादमहाक्रमम् ।
तेषां तु क्रमराजानां सृष्टिरूपोऽग्रजः सदा ॥
ततस्तु स्थितिसंहारमनाख्यं च ततः परम् ।
भासाख्यं च ततः पश्चात् पूजयेदक्रमक्रमम् ॥ ४५५

क्रमसिद्धिः

(१)

[4]व्योमवामेश्वरी संज्ञा नादभूमिश्च खेचरी ।
आनन्ददिक्चरी संज्ञा गोचरी मन्त्रभूमिका ॥
मन्त्राणां द्रव्यरूपत्वादावलिर्भूचरी तथा ।

(२)

[5]संवित्क्रममिमं देव शृणु वक्ष्यामि सुन्दर ।
सृष्टिं स्थितिं च संहारानाख्याभासास्वरूपकम् ॥ ४६०
ज्ञानं मान्त्रं च मेलापं शाक्तं शाम्भवसंयुतम् ।

---

१. म० म० प०, पृ० १०१
२. म० म० प०, पृ० १०८
३. म० म० प०, पृ० १०८
४. म० म० प०, पृ० ८९
५. म० म० प०, पृ० ९७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(३)

[1]दोहे व्याप्तं गवि क्षीरं स्तनाभ्यां प्रसृतं यथा ।
सर्वगा व्यापिनी सूक्ष्मा एकस्मिन् प्रसृता शिवा ॥

(४)

[2]क्रकारः क्रोधरूपस्तु मकारो मङ्गलो भवेत् ।
क्रोधे तु मङ्गलं कुर्यात् क्रमः कालक्रमो भवेत् ॥ ४६५
गुर्वायत्तं क्रमज्ञानमाज्ञासिद्धिकरं परम् ।
क्रमज्ञानान्महादेवि त्रैलोक्यं कवलीकृतम् ॥

क्रमसूत्रम्

(१)

[3]बाह्यादन्तःप्रवेशः, आभ्यन्तराद्वा बाह्यस्वरूपानुप्रवेशः ।

(२)

[4]यथा वह्निरुद्बोधितो दाह्यं दहति तथा विषयपाशान् भक्षयेत् ।

(३)

[5]क्रममुद्रयाऽन्तःस्वरूपया बहिर्मुखः समाविष्टो भवति साधकः । ४७०
तत्रादौ बाह्यादन्तःप्रवेशः, आभ्यन्तराद् बाह्यस्वरूपे प्रवेश आवेश-वशाज्जायत इति सबाह्याभ्यन्तरोऽयं मुद्राक्रमः ।

---

१. म० म० प०, पृ० १०१
२. म० म० प०, पृ० १०९
३. म० म० प०, पृ० १६६
४, प्र० ह०, सू० १५
५. प्र० ह०, सू० १९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्रमस्तुतिः

(१)

[1]ईशत्वभावकलुषाः कति नाम सन्ति
ब्रह्मादयः प्रतिदिनं प्रलयाभिभूताः ।
एकः स एव जननि स्थिरबुद्धिरास्ते ४७५
यः पादयोस्तव सकृत् प्रणतिं करोति ॥

(२)

[2]ह्रीङ्कारमेव तव नाम गृणन्ति वेदाः
मातस्त्रिकोणनिलये त्रिपुरे त्रियोने ॥

क्रमस्तोत्रम्

(१)

[3]कौलार्णवानन्दघनोर्मिरूपा-
मुन्मेषमेषोभयभाजमन्तः । ४८०
निलीयते नीलकुलालये य-
स्तां सृष्टिकालीं सततं नमामि ॥

(२)

[4]महाविनोदार्पितमातृचक्र-
वीरेन्द्रकासृग्रसपानसक्ताम् ।
रक्तीकृतां च प्रलयात्यये तां ४८५
नमामि विश्वाकृतिरक्तकालीम् ॥

---

१. सौ० ल० सौभा०, श्लो० ४
२. सौ० ल० सौभा०, श्लो० ३२
३. त० आ० वि० ४ । १४८; पृ० १५८
४. त० आ० वि० ४ । १४९; पृ० १६०–१६१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(३)

[1]वाजिद्वयस्त्रीकृतवातचक्र-
प्रक्रान्तसंघट्टगमागमस्थाम् ।
शुचिर्यया ऽस्तंगमितोर्चिषा तां
शान्तां नमामि स्थितिनाशकालीम् ॥ ४९०

(४)

[2]सर्वार्थसंकर्षणसंयमस्य
यमस्य यन्तुर्जगतो यमाय ।
वपुर्महाग्रासविलासरागात्
संकर्षयन्तीं प्रणमामि कालीम् ॥

(५)

[3]उन्मन्यनन्ता निखिलार्थगर्भा ४९५
या भावसंहारनिमेषमेति ।
सदोदिता सत्युदयाय शून्यां
संहारकालीं मुदितां नमामि ॥

(६)

[4]ममेत्यहङ्कारकलाकलाप-
विस्फारहर्षोद्धतगर्वमृत्युः । ५००
ग्रस्तो यया घस्मरसंविदं तां
नमाम्यकालोदितमृत्युकालीम् ॥

---

१. त० आ० वि० ४ । १५०; पृ० १६३
२. त० आ० वि० ४ । १५१; पृ० १६५
३. त० आ० वि० ४ । १५२; पृ० १६७
४. त० वि० ना० ४ । १५४; पृ० १६९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(७)

[1]विश्वं महाकल्पविरामकल्प-
भवान्तभीमभ्रुकुटिभ्रमन्त्या ।
याऽश्नात्यनन्तप्रभवार्चिषा तां ५०५
नमामि भद्रां शुभभद्रकालीम्'॥

(८)

[2]मार्तण्डमापीतपतङ्गचक्रं
पतङ्गवत् कालकलेन्धनाय ।
करोति या विश्वरसान्तकां तां
मार्तण्डकालीं सततं प्रणौमि ॥ ५१०

(९)

[3]अस्तोदितद्वादशभानुभाजि
यस्यां गता भर्गशिखा शिखेव ।
प्रशान्तधाम्नि द्युतिनाशमेति
तां नौम्यनन्तां परमार्ककालीम् ॥

(१०)

[4]कालक्रमाक्रान्तदिनेशचक्र- ५१५
क्रोडीकृतान्ताग्निकलाप उग्रः ।
कालाग्निरुद्रो लयमेति यस्यां
तां नौमि कालानलरुद्रकालीम् ॥

---

१. त० आ० वि० ४ । १५८; पृ० १७३
२. त० आ० वि० ४ । १६३; पृ० १७८
३. त० आ० वि० ४ । १६७; पृ० १८१
४. त० आ० वि० ४ । १६८; पृ० १८३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(११)

[1]नक्तं महाभूतलये श्मशाने
दिक्खेचरीचक्रगणेन साकम् । ५२०
कालीं महाकालमलं प्रसन्तीं
वन्दे ह्यचिन्त्यामनिलानलाभाम् ॥

(१२)

[2]क्रमत्रयत्वाष्ट्रमरीचिचक्र-
संचारचातुर्यतुरीयसत्ताम् ।
वन्दे महाभैरवघोरचण्ड- ५२५
कालीं कलाकाशशशाङ्ककान्तिम् ॥

(१३)

[3]या सा जगद् ध्वंसयते समग्रं
मृत्योर्वपुर्ग्रासयतीति विष्वक् ।
धामाग्निरूपीयसहस्रदीप्तां
तां नौमि कालानलरुद्रकालीम् ॥ ५३०

(१४)

[4]कालानलाद्व्योमकलावसानं
चिन्त्यं जगद् ग्रासकलालयेन ।
चक्रं महासंहृतिरूपमुग्रं
गतं चिदाकाशपदस्थमित्थम् ॥

---

१. त० आ० वि० ४ । १७०; पृ० १८५
२. त० आ० वि० ४ । १७१-७२; पृ० १८८
३. त० आ० वि० ४ । १७३; पृ० २०२
४. त० आ० वि० ४ । १९१; पृ० २२३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्रमोदयः

(१)

[1]प्रविष्टेऽन्तः सिन्धुरसे भेदनिर्हरणात्मके । ५३५
स्थैर्यमेति चमत्कारो विना विषयसङ्गतिम् ॥

(२)

[2]रागो माया कलाऽविद्या नियतिः काल एव च ।
पञ्चवृत्त्याश्रयाः सर्वे पाशाश्चेति प्रकीर्तिताः ॥

(३)

[3]स्त्रियः सर्वेषु वर्णेषु योगिन्यः स्युर्न संशयः ।
देहवद् योनिशुद्धिस्तु आत्मवल्लिङ्गशोधनम् ॥ ५४०
योनौ नवाक्षरीं न्यस्य लिङ्गे सप्तदशाक्षरीम् ।
गुरुचक्रस्य पूजार्थं कुर्याद् योगिनिमेलनम् ॥
नवाक्षर्या तु मन्त्रेण स्थापयेल्लिङ्गपीठवत् ।
शिवशक्त्यात्मभावेन पुरुषो मन्थकः स्मृतः ॥
मन्थयेदात्मनः शक्तिं मधुवच्छुक्लशोणितम् । ५४५

क्रियाकरणमण्डनम्

[4]निर्वी (निर्वि) शेषकृता
तूपाधिकरणाचार्यस्थितेनाऽमुना ।
साधारा तु चतुर्विधा
सह विना बीजाधिकारक्रमात् ॥

---

१. यो० दी०, पृ० २६६, २८३
२. म० म० प०, पृ० ५०
३. म० म० प०, पृ० ८७
४. क्ष० र० सं०, पृ० ६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वेधाद्या शिवलोकधर्मभजनात् ५५०
तत्रादिमा भौतिकी ।
नैष्ठिक्यप्यपरा तु जातिचरिता
त्यागात् कृता संस्क्रिया ॥
निर्बीजा द्विविधा नृणा-
ममृतदा सद्यश्चिरेणापि या । ५५५
नित्याद्याश्रयवर्जनात् तु
सदधिकाराधिकारोज्झिता ॥
साधारेति चतुर्विधा पुनरियं
ज्ञानक्रियाभ्यां द्विधा ।
ज्ञानी ज्ञानवतां क्रिया त्वविदुषां ५६०
या चाक्षुषी पूर्विका ॥

—:०:—

चन्द्रज्ञानम्

(१)

[1]येन प्रबुद्धभावेन भुञ्जानो विषयान् स्वयम् ।
न याति पाशवं भावं ज्ञानचन्द्रः सः कीर्तितः ॥

(२)

[2]अध ऊर्ध्वं दिशः सर्वा भूमिरापोऽनलस्तथा ।
वायुश्च खं मनो बुद्धिरहङ्कारश्च ये गुणाः ॥ ५६५
सर्वं शून्यं निरालम्बं तत्र सर्वं प्रतिष्ठितम् ।
यत्-किञ्चित् सकलं भावरूपं तन्त्रेषु वर्णितम् ॥
तदसारतरं चन्द्रमायास्वप्नोपमं स्थितम् ।

१. म० म० प०, पृ० १६६
२. वि० भै० वि०, श्लो० १३४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भ्रान्तिं त्यजस्व वै पुत्र सर्वं शून्ये प्रतिष्ठितम् ॥
शून्यात् प्रवर्तते शक्तिः शक्तेर्वर्णाः प्रजज्ञिरे । ५७०
वर्णेभ्यश्च तथा मन्त्रा मन्त्रेभ्यः सृष्टिरव्यया ॥
तस्मात् शून्यं जगद् ध्यायेद्यन्न नश्येत् कदाचन ।

(३)

[1]यथेन्दुः पुष्पसंकाशः समन्तादवभासते ।
आह्लादनसमूहेन जगदाह्लादयेत् क्षणात् ॥
तद्वद् देवि महायोगी यदा पर्यटते महीम् । ५७५
ज्ञानेन्दुकिरणैः सर्वैर्जगच्चित्रं समस्तकम् ॥
आह्लादयेत् समन्तात्तदवीच्यादिशिवान्तकम् ।

—:०:—

चन्द्रज्ञानविद्या

(१)

[2]चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ॥
त्रिकोणमष्टकोणं च दशकोणद्वयं तथा । ५८०
चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥
बिन्दुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकम् ।
चतुरश्रं च चत्वारि शिवचक्राण्यनुक्रमात् ॥
त्रिकोणे बैन्दवं श्लिष्टमष्टारेऽष्टदलाम्बुजम् ।
दशारयोः षोडशारं भूगृहं भुवनाश्रके ॥ ५८५

---

१. शि० वि०, पृ० २३
२. सौ० ल० लक्ष्मी०, पृ० ७१–७२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शैवानामपि शाक्तानां चक्राणां च परस्परम् ।
अविनाभावसंबन्धं यो जानाति स चक्रवित् ॥
त्रिकोणमष्टकोणं च दशकोणद्वयं तथा ।
अथाऽधिकारिणः पत्युः क्रीडतः परमं पदम् ॥ १४२५
स्वतन्त्रस्यापि वक्तव्यं स्वभावोऽस्य यतः पुरा ।
तथा शिवैकरूपं च स्यान्नटे बहुरूपवत् ॥

(२)

[1]मोक्षः सप्तप्रकारोऽयं विभागेनोपवर्णितः ।
एभ्यो ह्येकः परः सूक्ष्मः कार्यकारणगोचरः ॥
अतीतः परिपूर्णश्च स्वतन्त्रः सर्वतोमुखः । १४३०
एको निरीश्वरः स्वस्थः षडन्ये सेश्वरा मताः ॥
संरुद्धशक्तयश्चान्ये स्थूलभेदाः प्रकीर्तिताः ।
यान् विमोचयति स्वापे शिवाः सद्यो भवन्ति ते ॥
संहृतौ वा समुद्भूता अणवः पतयोऽथवा ।

(३)

[2]प्राधान्येन स्थिता ह्येता विद्या मन्त्राश्च सुव्रत । १४३५
एकाशीतिपदा देवी या सा शक्तिः शिवात्मिका ॥
शा(न्तौ)न्ताद् विनिर्गता पूर्वस्थानं तस्यास्तदात्मकम् ।
लये च शिवतत्त्वाख्यं व्यक्तौ बिन्द्वा(त्मकं)ह्वयं परम् ॥
भो(गः)गे सदाशिवस्था(ने)नं ईश्वराख्ये च शासने ।
विद्यातत्त्वेऽधिकारः स्याद् योनिर्ज्ञेया सदैव हि ॥ १४४०
तस्यामेव स्थिता मन्त्रा विद्याश्च विविधा मुने ।
इयं तावन्महाशक्तिः शिवस्य परमात्मनः ॥

(४)

[3]विद्या भानुमती नाम भासुरप्रतिमा तु सा ।
ततोऽन्याऽपि मुखभागा रौद्री रौद्रेण कर्मणा ॥

---

१. श० र० सं०, पृ० २९
२. श० र० सं०, पृ० ४२
३. श० र० सं०, पृ० ४३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विश्वा च काली कापाली विद्याऽन्यापि महोदया । १४४५
सुखोदयाऽन्या विख्याता तथा वज्रीति कीर्तिता ॥
अष्टावेता यशस्विन्यो विद्येशानां महात्मनाम् ।
क्रीडनार्थं विलासिन्यः पशूनां पाशमोचिकाः ॥

(५)

[1]ब्रह्माण्यङ्गानि यानि स्युस्तानि सादाख्यगोचरे ।
नादो बिन्दुः सकलः सादाख्यं तन्त्रमाश्रितौ कथितौ ॥ १४५०

(६)

[2]मेरुपृष्ठं यथा प्राप्तास्तृणलोष्टादयो भृशम् ।
प्राप्नुवन्ति सुवर्णत्वं तद्वत् सादाशिवे पदे ॥

(७)

[3]स्थितये सर्वभूतानां शरीराण्यसृजत् पुरा ।
स्थूलानि तद्विशिष्टानि सृष्टवान् भूतनायकः ॥

(८)

[4]क्षोभितोऽनन्तनाथेन ग्रन्थिर्मायात्मको यदा । १४५५
तदा स्वेन विकारेण तनो(करो)ति विपुलं जगत् ॥

(९)

[5]जातिभेदाद् रूपभेदाच्छौर्यविज्ञानभेदतः ।
सौभाग्यभेदतश्चापि दौर्भाग्येन च लक्ष्यते ॥
एवं मध्योत्तमाद् भोगात् कनिष्ठाच्चैव भेदतः ।

---

१. श० र० सं०, पृ० ४३
२. श० र० सं०, पृ० ४३
३. श० र० सं०, पृ० ५१
४. श० र० सं०, पृ० ५३
५. श० र० सं०, पृ० ५४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्यूनं न्यूनतमानि स्युः श्रेष्ठं श्रेष्ठतमानि च ॥ १४६०
पशूनामुपसर्पन्ति त्रिभागांस्तेष्वथोच्यते ।

(१०)

[1]लोकेऽपि सुप्रतीतं स्याद् द्विविधं कर्म कर्मिणाम् ।
क्रियावसानिकं दृष्टमदृष्टं तत्र संक्षये ॥

(११)

[2]तन्निपाताच्च तस्येत्थमज्ञस्याप्यभिलाषिणः ।
बुद्धिरुत्पद्यतेऽकस्माद् विवेकेनात्मवर्तिना ॥ १४६५

(१२)

[3]प्रेरणे प्रेरकः श्रीमान् द्वयोरपि स मन्त्रराट् ।
अनुग्राह्यस्य विनये तथाऽनुग्राहकस्य च ॥
कारुण्ये त्वनयोर्यस्मात् तयोर्योगः सुदुर्लभः ।

(१३)

[4]योगवीर्यबलोपेता दीक्षया वा नियोजिताः ।
सदाशिवसमाः सर्वे न चैके कारणेश्वराः ॥ १४७०
न शिवत्वमनुप्राप्तास्तेषां कर्मोच्यतेऽधुना ।
सामीपयाः शान्तिनिलया ज्ञानकेवलिनो मताः ॥
सालोक्याश्चैव विद्यायां येऽप्यधः परिपिण्डिताः ।
योगकेवलिनस्तेऽपि तन्त्रेऽस्मिन् परिभाषिताः ॥

---

१. श० र० सं०, पृ० ५५
२. श० र० सं०, पृ० ६६
३. श० र० सं०, पृ० ६७
४. श० र० सं०, पृ० ७७-७८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सान्निध्यात् तु प्रतिष्ठायां शक्तिकेवलिनो मताः । १४७५
काम्याश्चैव निवृत्तिस्था मूर्तिकेवलिनः स्मृताः ॥
नादाख्ये चैव ये तत्त्वे संस्थिताः परमाणवः ।
मूर्तिकेवलिनस्तेऽपि शेषा रुद्राः प्रकीर्तिताः ॥

(१४)

[1]अनयोः शासने सिद्धा दीक्षा क्षपणदानयोः ।

(१५)

[2]दीक्षानलप्लुष्टमलस्य जन्तोः १४८०
स्वाक्यं बलं व्यक्तिमुपैति योगात् ।
शक्त्या विभोश्चुम्बितहृत्प्रदेशो
नान्येन पुंसो विनिवृत्तिमेति ॥

(१६)

[3]समत्वधर्मव्यापारः कष्टोऽयं स्यात् सुदुष्करः ।

मतदेवः

(१)

[4]यस्येच्छातः सतां देवि जीवन्मुक्तिः क्षणाद् भवेत् । १४८५
तस्याहं वच्मि दिव्यौघं जीवन्मुक्तिप्रवृद्धये ॥

---

१. श० र० सं०, पृ० ७८
२. श० र० सं०, पृ० ८०
३. त० आ० वि० १३ । ३८३; पृ० १७३
४. म० म० प०, पृ० १३५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मनोऽनुशासनस्तोत्रम्

[1]हंसाः पतन्ति गगने प्रविसार्य पक्षौ
स्वौ सर्वदैव किल मानसराजहंस ।
अत्यद्भुता तव गतिर्गगने परस्मिन्
विक्षेपशून्यमयपक्षयुगं विहाय ॥ १४९०

(२)

[2]स्वातन्त्र्यापरपर्यायमायाजाड्यविलापनात् ।
विलीय चिद्रसीभूतं विश्वानन्दमुपास्महे ॥

(३)

[3]स्तब्धदृष्टिबहिरर्थसंश्रयं निर्विकल्पमपि यत्तवासनम् ।
मुक्तपञ्जरशुकानुकारि तद् भैरवं वपुरुदारमाहर ॥

महानयपद्धतिः

(१)

[4]परमनिरावरणात्मनि रूपे यो दृढतरः परामर्शः । १४९५
पूजनमेतदितीत्थं प्रभुणा निरणायि यद्यपि प्रकृतम् ॥

महाम्नायः

[5]यत्पीठचक्रार्चितपञ्चवाहप्रकाशमानन्दखमूर्तिचक्रम् ।
अष्टाष्टचक्रं प्रविराजते तद् गुरुक्रमौघं सचतुष्टयार्थम् ॥

---

१. म० म० प०, पृ० १३
२. म० म० प०, पृ० ४६
३. म० म० प०, पृ० ९४
४. म० म० प०, पृ० ११२
५. म० म० प०, पृ० ८६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महाबलः

[1]यथार्थनाम्नः क्रोधे ।

महार्थोदयः

(१)

[2]अथ हव्यमिदन्ताख्यं हावं हावं स्वचिन्मुखे । १५००
उल्लङ्घ्य मायामालिन्यं स्वैरमासीत मेरुवत् ॥

महास्वच्छन्दः

(१)

[3]गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ।
प्रश्नोत्तरपरैर्वाक्यैस्तन्त्रं समवतारयत् ॥

महास्वच्छन्दसंग्रहः

[4]शब्दः शान्तत्वघोरत्वविशेषापन्नरूपकः ।
शब्दस्तु शब्दतन्मात्रं मृदूष्णकठिनश्चलः ॥ १५०५
विशिष्टस्पर्शरूपश्च स्पर्शतन्मात्रसंज्ञितः ।
नीलपीतत्वशुक्लत्वविशिष्टं रूपमेव च ॥

---

१. स्प० प्र०, पृ० ३
२. म० म० प०, पृ० १३२
३. यो० दी०, पृ० २
४. यो० दी०, पृ० १३३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपतन्मात्रमित्युक्तं मधुरत्वादिसंयुतम् ।
रसतन्मात्रसंज्ञं तु सौरभ्यादिविशेषितः ॥
गन्धः स्याद् गन्धतन्मात्रं तेभ्यो वै भूतपञ्चकम् । १५१०
आकाशः शब्दतन्मात्रं नित्यं शब्दगुणं महत् ॥
व्यापकं निर्मलं तत्त्वमवकाशप्रदानकम् ।
स्पर्शतन्मात्रतो वायुश्चलद्रूपोऽनिलोऽभवत् ॥
जगत्प्राणोऽनिलो व्यूहप्रेरणं च लघुर्भवेत् ।
शब्दस्पर्शगुणः प्रोक्तो गमनागमनकर्मकृत् ॥ १५१५
शब्दस्पर्शरूपगुणं तेजस्तत्त्वं प्रभास्वरम् ।
रूपतन्मात्रकार्यं च पाककर्मकरं शिवे ॥
रसतन्मात्रतो जातं वारितत्त्वं द्रवात्मकम् ।
शब्दस्पर्शरूपरसगुणसंग्रहकर्मकृत् ॥
शब्दस्पर्शरूपरसगन्धपञ्चगुणान्वितम् । १५२०
पृथिवीतत्त्वमाख्यातं कठिनं सर्वधारणम् ॥
पृथिव्यादिव्योमतत्त्वान्तपञ्चकं पूर्वपूर्वकम् ।
कार्यं सृष्ट्या समावृत्त्य वर्तते पञ्चकं क्रमात् ॥

मातृकाहृदयम्

(१)

[1]कंकारादिक्षकारान्ता वर्णास्ते शिवरूपिणः ।
समस्तव्यस्तरूपेण षट्त्रिंशत्तत्त्वविग्रहाः ॥ १५२५
अकारादिविसर्गान्ताः स्वराः षोडश शक्तयः ।
नित्याषोडशकात्मानः परस्परममी युताः ॥
[1]शिवशक्तिमया वर्णाः शब्दार्थप्रतिपादकाः ।

---

१. सौ० ल० सौभा०, श्लो० १

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवः स्वरपराधीनो न स्वतन्त्रः कदाप्यसौ ॥
स्वराः स्वतन्त्रा जायन्ते न शिवस्तु कदाचन । १५३०

मानसोल्लासः

(१)

[1]विष्णुः शिवः सुरज्येष्ठो मनुश्चन्द्रो धनाधिपः ।
लोपामुद्रा तथाऽगस्त्यः स्कन्दः कुसुमसायकः ॥
सुराधीशो रौहिणेयो दत्तात्रेयो महामुनिः ।
दुर्वासा इति विख्याता एते मुख्या उपासकाः ॥

(२)

[2]येऽपि ब्रह्मादयो देवा भवन्ति वरदायिनः । १५३५
त्वद्रूपां शक्तिमासाद्य ते भवन्ति वरप्रदाः ॥
तस्मात् त्वमेव सर्वत्र कर्मणां फलदायिनी ॥

(३)

[3]हरं त्यक्त्वा हरिरभूद्धरिरेव तवाम्बिके ।
स्फुरच्छक्तिः पुनरभूदपरः सन्धियोगतः ॥

(४)

[4]सर्वतत्त्वात्मतेजोभिरिद्धं तव पदाम्बुजम् । १५४०
ध्यायेच्छिवे वरारोहे साक्षात् तेजोमयो भवेत् ॥

---

१. सौ० ल० सौभा०, श्लो० १; अरु०, पृ० २२
२. सौ० ल० सौभा०, श्लो० १
३. सौ० ल० सौभा०, श्लो० १
४. सौ० ल० सौभा०, श्लो० १४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(५)

[1]दशापञ्चकभेदेन प्रपञ्चस्य विलासिनः ।
साक्षिणी चाक्षरी यस्मात्तस्मात् पञ्चदशाक्षरी ॥

मायावामनसंहिता

(१)

[2]विष्णु-शिव-सूर्य-बुद्धादिरूपतया तत्तच्छक्तिचक्र-
परिवारयुक्तस्तत्कारणं भगवानेक एव ध्यानभेदेनोपास्यत्वेना- १५४५
भिहितः ।

मालिनीमतम्

(१)

[3]एवमस्यात्मनः काले कस्मिंश्चिद् योग्यतावशात् ।
शैवी संबध्यते शक्तिः शान्ता मुक्तिफलप्रदा ॥
तत्संबन्धात्ततः कश्चित् तत्क्षणादपवृज्यते ।
अज्ञानेन सहैकत्वं कस्यचिद् विनिवर्तते ॥ १५५०
रुद्रशक्तिसमाविष्टः स यियासुः शिवेच्छया ।
भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति ॥
तमाराध्य ततस्तुष्टाद् दीक्षामासाद्य शाङ्करीम् ।
तत्क्षणाद् वोपभोगाद्वा देहपाताच्छिवं व्रजेत् ॥

---

१. सौ० ल० सौभा०, श्लो० ३२
२. स्प० प्र०, पृ० ११
३. त० आ० १३ । १९९–२०३; पृ० १२७–१२८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुकुटतन्त्रम्

(१)

[1]श्रोतारः शिवभेदानां पारम्पर्यास्त्रयस्त्रयः । १५५५
द्वौ द्वौ तु रुद्रभेदानां षष्टिरुक्ता षडुत्तरा ॥

मुख्याम्नायरहस्यविधिः

(१)

[2]इन्द्रियद्वारसंग्राह्यैर्गन्धाद्यैरात्मदेवताम् ।
स्वभावेन समाराध्य ज्ञातुः सोऽयं महामखः ॥

मोक्षोपायः

(१)

[3]स्वापरामर्शमात्रोऽयमपराधः कियानसौ ।
तावन्मात्रेण तज्ज्ञातं यद् वक्तुं नैव पार्यते ॥ १५६०

---

१. शा० र० सं०, पृ० १०
२. यो० दी०, पृ० १९६, २७२
३. म० म० प०, पृ० २८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

योगपादः (मतङ्गसूत्रीयः)

(१)

[1]शेषवत् पूर्ववच्चान्यत् सामान्यमपरं स्मृतम् ।

(२)

[2]स्थूलावृत्तशकृत्पुञ्जभूपृष्ठं मदगन्धि च ।
स्तम्भशय्यादिभिश्चिह्नैरत्रासीन्मत्तवारणः ॥
अतीतो ह्यनुमानेन साध्यः शेषवता बुधैः ।

(३)

[3]कृष्णाञ्जननिभैरुच्चैः सागोपैर्निबिडैर्घनैः । १५६५
निर्विघ्नैर्विपुलैः स्निग्धैस्तडिन्निर्घोषसंकुलैः ॥
प्रावृट्समयसम्प्राप्तैर्दृष्टैर्वृष्टिः प्रमीयते ।
एवं पूर्ववता साध्यमनुमानेन वृट् सदा ॥

योगसंचरः

(१)

[4]ये चक्षुर्मण्डले श्वेते प्रत्यक्षे परमेश्वरि ।
षोडशारं द्वादशारं तत्रस्थं चक्रमुत्तमम् ॥ १५७०

---

१. श० र० सं०, पृ० १३
२. श० र० सं०, पृ० १४
३. श० र० सं०, पृ० १४
४. त० आ० ४।१२७; पृ० १३६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]षोडशातः समासेन शृणुष्वैकमना हर ।
सा सत्ता लीयते यस्याः काली द्व्यष्टकला स्मृता ॥

(३)

[2]प्रतिवारणवद् रक्ते तद्बहिर्ये तदुच्यते ।
द्वितीयं मध्यगे ये ते कृष्णश्वेते च मण्डले ॥
तदन्तर्ये स्थिते शुद्धे भिन्नाञ्जनसमप्रभे । १५७५
चतुर्दले तु ते ज्ञेये अग्नीषोमात्मके प्रिये ॥
मिथुनत्वे स्थिते ये च चक्रे द्वे परमेश्वरि ।
संमीलनोन्मीलनं ते अन्योन्यं विदधातके ॥

(४)

[3]मोक्षः सर्वप्रकाशनात् ।

(५)

[4]विकल्पयुक्तचित्तस्तु पिण्डपाताच्छिवं व्रजेत् । १५८०

(६)

[5]तथाहि योगसंचारे मन्त्राः स्युर्भुवि पार्थिवाः ।
आप्ये आप्या यावदमी शिवे शिवमया इति ॥

(७)

[6]चतुर्दशविधे भूते पुष्पे धूपे निवेदने ।
दीपे जपे तथा होमे सर्वत्रैवात्र चण्डिका ॥

---

१. त० आ० वि० ४।१२७; पृ० १३६
२. त० आ० ४।१२८-१३०; पृ० १३७-३८
३. त० आ० ६।५८; पृ० ५१
४. त० आ० वि० १३।२४२; पृ० १४९
५. त० आ० १५।६५; पृ० ३९
६. त० आ० १५।३९२-३९३; पृ० १९७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जुहोति जपति प्रेद्धे पूजयेद् विहसेद् व्रजेत् । १५८५
आहारे मैथुने सैव देहस्था कर्मकारिणी ॥

(८)

[1]योगचारे च यद्यत्र तन्त्रे चोदितमाचरेत् ।
तथैव सिद्धये सेयमाज्ञेति किल वर्णितम् ॥

(९)

[2]तत्र पर्वविधिं ब्रूमो द्विधा पर्व कुलाकुलम् ।
कुलाष्टककृतं पूर्वं प्रोक्तं श्रीयोगसंचरे ॥ १५९०

(१०)

[3]उक्तं श्रीयोगसंचारे स च चित्रस्वरूपकः ।

(११)

[4]उक्तं श्रीयोगसंचारे ब्रह्मचर्ये स्थितिं भजेत् ।

(१२)

[5]श्रीयोगसंचरेऽपि च मुद्रेयं योगिनीप्रिया परमा ।

(१३)

[6]अनया हि खचारी श्रीयोगसंचार उच्यते ।

---

१. त० आ० २३ । १२-१३; पृ० २६६
२. त० आ० २८ । १०; पृ० ६
३. त० आ० २९ । ८२; पृ० ५७
४. त० आ० २९ । ९७; पृ० ६४
५. त० आ० २९ । १५०; पृ० १०४
६. त० आ० ३२ । ३१; पृ० ३१७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(१४)

[1]आनन्दं ब्रह्म तद्देहे त्रिधौष्ठ्यान्त्यव्यवस्थितम् । १५९५
अब्रह्मचारिणस्तस्य त्यागादानन्दवर्जिता ॥
आनन्दकृत्रिमाहारवर्जं चन्द्रस्य याजकाः ।
द्वयेऽपि नरके घोरे तस्मादेनां स्थितिं भजेत् ॥

योगिनाथः

(१)

[2]तदेवं त्वत्प्रवृत्त्या त्वन्निवृत्त्या चोदयेतरे ।
जुषन्ते येन तत्त्वानि तान्यतः स्पन्द एव ते ॥ १६००
वैसादृश्येऽपि कार्यस्याऽस्य च दृष्टान्तमाह यत् ।
ज्वलनाद्धूमोद्गतिरिव विविधाकृतिरम्बरे गता भाति ।
तद्वद् विष्णोः सृष्टिः स्वभावजा द्वैतरूपेयम् ॥
प्राश्यानश्चिद्रसस्यौघः साकारत्वमुपागतः ।
अवश्यायः प्रबोधार्के तूदिते स्वस्वभावभाक् ॥ १६०५

(२)

[3]तस्मात् सर्वस्य सिद्धार्थं भारती कारणं परे ।
परेष्टव्या तदा रूपान्वेषणेनार्थनिश्चयात् ॥
तस्या औन्मुख्यवृत्त्यैव सद्भावपरिकल्पनात् ।
नहि तामन्तरेणैषा त्वमेताऽऽत्मानमम्बिके ॥

---

१. तन्त्र० अभि०, पृ० १९८
२. स्प० प्र०, पृ० ५-६
३. स्प० प्र०, पृ० ३७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सा च तस्यामवस्थायां स्वरूपज्योतिरिष्यते । १६१०
निर्विभागक्रमापेक्षा योगिगम्यानुरूपिणी ॥
तत औन्मुख्यतश्चिन्तामयी भवति वाक् शिवे ।
विशिष्टशब्दविषयविवक्षास्फुरणात्मिका ॥
ततः शब्दात्मकत्वेन विवृत्तार्थमयी भवेत् ।
तदात्मतामन्तरेण यस्मान्नार्थावधारणम् ॥ १६१५

रत्नत्रयम्

(१)

[1]ज्ञानशक्त्या विजानाति क्रियया कुरुते जगत् ।

रत्नमाला

(१)

[2]यस्मिन् काले तु गुरुणा निर्विकल्पं प्रभाषितम् ।
तदैव किल मुक्तोऽसौ यन्त्रं तिष्ठति केवलम् ॥

(२)

[3]अदृष्टं निर्गुणं यच्च हेयोपादेयवर्जितम् ।
तत्तत्त्वं सर्वतत्त्वानां प्रधानं परिपठ्यते ॥ १६२०
अदृष्टविग्रहश्चैव स शान्त इति गीयते ।
तस्येच्छा निर्गता शक्तिस्तद्धर्मगुणसंयुता ॥

---

१. श० र० सं०, पृ० १६
२. म० म० प०, पृ० १७३
३. त० आ० वि० १ । २७४; पृ० २८२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(३)

[1]सृष्टिमार्गानुसारेण आयातश्चावनीतले ।
कथितो देवि षष्ठस्तु यथावेशस्वरूपतः ॥

(४)

[2]महानवान्तरो दिव्यो दिव्यादिव्यश्चतुर्थकः । १६२५
इतरेतरमार्गेण पञ्चधा भिन्नलक्षणम् ॥

(५)

[3]शिवस्य परिपूर्णस्य परस्यामिततेजसः ।
तच्छक्तिश्चैव सादाख्या स्वेच्छाकर्तृत्वगोचरा ॥
सत्त्वं तेन च संप्राप्तं संबन्धं प्रथमं विदुः ।
अवान्तरश्च योगेन सादाख्यात् क्रमशः पुनः ॥ १६३०
प्राप्तोऽनन्तेशदेवेन द्वितीयस्तेन कीर्तितः ।
तृतीयस्तु पुनर्देवि श्रीकण्ठो नन्दिना सह ॥
द्वाभ्यां देवात्तु मत्वैवं तेन दिव्यः प्रकीर्तितः ।
ऋषीणां च समासेन नन्दिना प्रतिपादितम् ॥
चतुर्थस्तु भगवता दिव्यादिव्यः प्रकीर्तितः । १६३५
व्याख्यानक्रमयोगेन विद्यापीठप्रपूजने ॥
शिष्याचार्यस्वरूपेण पञ्चमस्त्वितरेतरः ।
इति पञ्चप्रकारोऽयं संबन्धः परिकीर्तितः ॥

---

१. त० आ० वि० १ । २७४; पृ० २८२
२. त० आ० वि० १ । २७४; पृ० २८२
३. त० आ० वि० १ । २७४; पृ० २८३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रसान्वयः

(१)

[1]या चित् सत्तैव सा प्रोक्ता सा सत्तैव चिदुच्यते ।
यत्र चित्सत्तयोर्व्याप्तिस्तत्रानन्दो विराजते ॥ १६४०
यत्रानन्दो भवेद् भावे तत्र चित्सत्तयोः स्थितिः ।

रहस्यशास्त्रम्

(१)

[2]आदौ यस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता ।
अम्बिका बाहुरित्युक्ता ज्येष्ठा चैवायुधे स्थिता ॥

(२)

[3]अत्र नाथः समाचारं पटलेऽष्टादशेऽभ्यधात् ।
नात्र शुद्धिर्न चाशुद्धिर्न भक्ष्यादिविचारणम् ॥ १६४५
न द्वैतं नापि चाद्वैतं लिङ्गपूजादिकं न च ।
न चापि तत्परित्यागो निष्परिग्रहतापि वा ॥
सपरिग्रहता वापि जटाभस्मादिसंग्रहः ।
तत्त्यागो न व्रतादीनां चरणाचरणं च यत् ॥
क्षेत्रादिसंप्रवेशश्च समयादिप्रपालनम् । १६५०
परस्वरूपलिङ्गादिनामगोत्रादिकं च यत् ॥
नास्मिन् विधीयते किञ्चिन्न चापि प्रतिषिध्यते ।
विहितं सर्वमेवात्र प्रतिषिद्धमथापि वा ॥

---

१. म० म० प०, पृ० ३५
२. वि० भै० वि०, श्लो० ७७
३. वि० भै० वि०, श्लो० १२३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किन्त्वेतदत्र देवेशि नियमेन विधीयते ।
तत्त्वे चेतः स्थिरीकार्यं सुप्रयत्नेन योगिना ॥ १६५५
तच्च गम्यं यथैव स्यात् स तथैव समाचरेत् ।
एतन्मनसि संधाय वशिष्ठेन स्फुटं कृतम् ॥
समाधिमथ कर्माणि मा करोतु करोतु वा ।
तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि ॥
न संस्पृश्येत दोषैः स पद्मपत्रमिवाम्भसा । १६६०

(अस्य योगिनः)

पेयापेयं स्मृता आपो भक्ष्याभक्ष्यं तु पार्थिवम् ॥
सुरूपं च विरूपं च तत्सर्वं तेज उच्यते ।
निर्दोषं हि समं ब्रह्म तत्स्फुटं नित्यमभ्यसेत् ॥
विषापहारिमन्त्रादिसंनद्धो भक्षयन्नपि ।
विषं न मुह्यते तेन तद्वद् योगी महामतिः ॥ १६६५
अशुद्धं हि कथं नाम देहाद्यं पाञ्चभौतिकम् ।
प्रकाशतातिरिक्ते किं शुद्ध्यशुद्धी हि वस्तुनि ॥

(३)

[1]शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते ।
शक्तयश्च जगत् सर्वं शक्तिमांस्तु महेश्वरः ॥

रहस्यसिद्धिसोपानम्

(१)

[2]कुण्डलिन्या महीभेदे योगी त्यजति मेदिनीम् । १६७०
सलिलस्थानयोगेन जले चलति योगवित् ॥

१. स्प० प्र०, पृ० १२
२. सौ० ल० सौभा०, श्लो० ९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वह्नेर्भेदे जलमिव स्पृशत्यग्निं ज्वलच्छिखम् ।
मरुद्भेदे शीघ्रगतिर्याति क्रोशशतं क्षणात् ॥
व्योमभेदे खे चरति मनोभेदे मनोगतिः ।
यत्र कामयते तत्र याति लोकत्रयेऽपि च ॥ १६७५
संयोजयन् शिवपदे शिव एव प्रजायते ।
कर्ता हर्ता च सर्वत्र सुरासुरनमस्कृतः ॥

रहस्यस्तोत्रम्

(१)

[1]क्रोधहर्षविवशः परां दशा-
माश्रितोऽथ विमृशंश्च यः क्रियाम् ।
यत् स्पृशत्यनियतक्रियास्पदं १६८०
स्पन्दमात्मबलदं वदन्ति ते ॥
एषोऽन्यत्र त्रुटेः पातः प्रोक्तः सर्वज्ञतादिभाक् ।

(२)

[2]स्वात्मनि स्तिमितसोमभास्करं
व्योममार्गमतिवर्त्य तस्थुषः ।
भावनाश्चितदृशोऽपि खेचराः १६८५
केचिदेव तव धामदर्शिनः ॥

(३)

[3]विस्मृतार्थमभियुज्य धीर्यथा
त्वामशेषविदमाशु शंसति ।

---

१. स्प० प्र०, पृ० ३१
२. स्प० प्र०, पृ० ३२
३. स्प० प्र०, पृ० ४३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यदित्थमनयाऽर्थ्यते रसात्
स्वप्नगोऽपि न विलङ्घयिष्यसि ॥ १६९०

रुद्ररहस्यम्

(१)

[1]सर्वाधारा मही यस्मान्मूलाधारतया स्थिता ।
तदभावे तु देहस्य पातः स्यादुद्गमोऽपि वा ॥

रौरवागमः

(१)

[2]अधिकारं प्रकुर्वन्ति शिवेच्छाविधिचोदिताः ।

(२)

[3]यथा प्रदीप्तज्वलने तूलराशिः समर्पितः ।
दग्धो निर्वाति स तत्र न भूयः स्थूलतां व्रजेत् ॥ १६९५
एवं वै मण्डलं प्राप्य दीक्षामन्त्रसमुद्भवम् ।
न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः ॥

---

१. सौ० ल० लक्ष्मी०, पृ० ६९; सौ० ल० अरु०, पृ० ७२
२. श० र० सं०, पृ० २९
३. श० र० सं०, पृ० ८२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लक्ष्मीकौलार्णवः

(१)

[1]दीक्षासिद्धौ तु ये प्रोक्ताः प्रत्ययाः स्तोभपूर्वकाः ।
संधानस्यैव ते देवि कलां नार्हन्ति षोडशीम् ॥

(२)

[2]न संधानं विना दीक्षा न सिद्धीनां च साधनम् । १७००
न मन्त्रो मन्त्रयुक्तिश्च न योगाकर्षणं तथा ॥

(३)

[3]स्वयंभूर्भगवान् देवो जन्मसंस्कारवर्जितः ।
निर्विकल्पं परं धाम अनादिनिधनं शिवम् ॥
प्रत्यक्षं सर्वजन्तूनां न च पश्यति मोहितः ।

लघुबृंहणी

(१)

[4]बहिर्व्यवहरन् लोक्यान् स्थगयन्नूहगोचरान् । १७०५
चरन् कपटमार्गेण वामं नयमिवोन्नयेत् ॥

(२)

[5]ब्रह्मायुषो दशगुणं विष्णोरायुः परं स्मृतम् ।
सहस्रगुणितं तस्माद् रुद्रस्यायुः परं किल ॥

---

१. शि० वि०, पृ० ३५
२. शि० वि०, पृ० ३९
३. शि० वि०, पृ० ८३
४. म० म० प०, पृ० १४४
५. म० म० प०, पृ० १७३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्माल्लक्षगुणं प्रोक्तमीश्वरस्यायुरुत्तमम् ।
तस्मात् सदाशिवस्यायुः प्रोक्तं कोटिगुणं बुधैः ॥ १७१०
समुद्रगुणितं तस्मात् शिवयोर्देहधारणम् ।

वातुलोत्तरम्

(१)

[1]त(चि)न्मयोऽन्तर्बहिश्चैव षट्त्रिंशत्तत्त्वमुक्तियुक् ।
यथार्थतः स देवो हि तत्त्वातीतः परः शिवः ॥

वाजसनेयतन्त्रम्

(१)

[2]या सा शक्तिः परा सूक्ष्मा व्यापिनी निर्मला शिवा ।
शक्तिचक्रस्य जननी परानन्दाऽमृतात्मिका ॥ १७१५
महाघोरेश्वरी चण्डा सृष्टिसंहारकारिका ।
त्रिवहं त्रिविधं त्रिस्थं बलात् कालं प्रकर्षति ॥

(२)

[3]व्रतादौ च जपादौ च तयोरन्ते तथैव च ।
यागं कृत्वाथ विधिवत् स्वेन स्वमभिषेचयेत् ॥
यदि संपत्त्यभावः स्यान्मनसैव प्रकल्पयेत् । १७२०
यस्मादिदं जगत्सर्वं मनस्यन्तः प्रतिष्ठितम् ॥

---

१. श० र० सं०, पृ० ८०
२. शि० वि०, पृ० १३७
३. त० आ० वि० १३।१४०; पृ० ९४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततः पीयूषकलशं कलाकमलमण्डितम् ।
ध्यात्वा शिरसि तेनैव प्लावितं भावयेद् बुधः ॥
अभिषिक्तो भवेदेवं न बाह्यकलशाम्बुभिः ।
य एवमभिषिक्तः सन् सोऽधिकारी जपादिके ॥ १७२५

(३)

[1]इत्येतन्मातृकाचन्द्रं दिव्यं विष्णुपदास्पदम् ।
ज्ञानं गुरुमुखात् सम्यक् पशोः पाशान् निकृन्तति ॥

वायवीयसंहिता

(१)

[2]प्रधानपरमाण्वादि यावत् किञ्चिदचेतनम् ।
न तत् कर्तृ स्वयं दृष्टं बुद्धिमत्कारणं विना ॥
जगच्च कर्तृसापेक्षं कार्यं सावयवं यतः । १७३०
[3]तस्मात् कार्यस्य कर्तृत्वं पत्युर्न पशुपाशयोः ॥

(२)

[3]ज्ञानं वस्तुपरिच्छेदो वस्तु च त्रिविधं स्मृतम् ।

१. परा० अभि०, पृ० १५६
२. ज्ञ० र० सं०, पृ० २६
३. ज्ञ० र० सं०, पृ० ९३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वार्तिककारः

(१)

[1]स्वसंस्कारोचिताद् भोगादप्रच्यावः शरीरिणाम् ।
प्रोक्तं संरक्षणं नाम न्यायेन परिपालितम् ॥

—:०:—

वासुदेवः

(१)

[2]ऊर्ध्वशून्यमधः शून्यं मध्ये शून्यं निराश्रयम् । १७३५
त्रिशून्यं योऽभिजानाति स भवेत् कुलनन्दनः ॥

विज्ञानेन्दुकौमुदी

(१)

[3]मनो यत्रैव विश्रान्त्या पूर्णभावमुपाश्नुते ।
अतः परं हि किं नाम शुभक्षेत्रं भविष्यति ॥

(२)

[4]सर्वव्यापकताभूमिर्ज्ञत्वकर्तृत्वसम्मता ।
निजाभासचमत्कारमयी शिवदशा स्मृता ॥ १७४०

---

१. श० र० सं०, पृ० २९
२. वि० भै० वि०, पृ० ४०
३. म० म० प०, पृ० २३
४. म० म० प०, पृ० ३९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विद्याधिपतिः

(१)

[1]भक्षणप्रकृतिना समाधिना युक्तितो विषयधाम्नि भक्षिते ।
सर्वभक्षपदवीमुपेयुषः शिष्यते परमभक्षितो भवान् ॥
सा चेन्द्रजालिनो मायैवाऽऽस्थिता बाधकात्मनि ।
यथाऽग्नेर्धूमलेखेव मलवद् दर्पणस्य वा ॥
बुद्बुदाः सलिलस्येव तच्छान्तौ निर्विकारिता । १७४५

विमर्शदीपिका

(१)

[2]विश्वात्म विश्वोत्तीर्णं च स्वतन्त्रं दिव्यमक्षरम् ।
अहमित्युत्तमं तत्त्वं समाविश्य बिभेति कः ॥

(२)

[3]स्वतन्त्रं परिपूर्णं च शिवाख्यं शून्यधाम तत् ।
तत्त्वानि यत्र लीयन्ते यस्मात् समुदयन्ति च ॥
तत्त्वेश्वरास्ततो जातास्तत्रैव निवसन्ति च । १७५०
क्षीयन्ते किल तत्रैव शिवाख्ये शून्यधामनि ॥
दर्शनान्तरदृष्टानि यानि शून्यान्तराण्यपि ।
तेषामुत्पत्तिविलयौ शिवशून्ये सदोदितें ॥
न तदस्ति न यत् तत्र न तदस्ति न यत्र तत् ।
अन्तर्बहीरूपतया ततोऽन्यन्नोपपद्यते ॥ १७५५

---

१. स्प० प्र०, पृ० २१
२. वि० भै० वि०, पृ० १०४
३. वि० भै० वि०, पृ० १२७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपेयमितरन्नास्ति स्वातन्त्र्यात् परमे नये ।
तदनादृत्य गाहन्ते सौगताः शून्यतां जडाः ॥

विवेकमार्तण्डः

(१)

[1]कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥

विश्वसंहिता

(१)

[2]ध्येये चित्तं यदा लीनं तदा ध्यानमुदाहृतम् । १७६०
ध्येयः प्रत्यक्षतां याति ध्याता तन्मयतां व्रजेत् ॥
ऋच्छतस्त्विति पाठाद्वा ध्येयं चिन्तयतोऽत्र या ।
तदाप्यतासमापत्तिरैक्यं तस्योदयः स तु ॥

विश्वसारोत्तरसूत्रम्

(१)

[3]धर्माधर्मात्मकं कर्म तच्च त्रिविधमर्थतः ।
जात्यायुर्भोगदं येन नामिश्रं पच्यते क्वचित् ॥ १७६५

---

१. वि० भै० वि०, श्लो० ८१.
२. स्प० प्र०, पृ० ४१
३. श० र० सं०, पृ० ५४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विषयपञ्चिका

(१)

[1]मधुरसरसवीणावेणुगीतादिवाद्य-
श्रवणजनितहर्षः शब्दमात्रैकशेषः ।
तदनुभवविरामप्रस्फुरद्बोधमूर्ति-
र्भवविभवविमुक्तो मुक्तिमाप्नोति सम्यक् ॥

विष्णुयामलम्

(१)

[2]पाहि पाहीति वचनात् तत्त्राणात्तत्त्वविग्रहाः । १७७०
परापरबलस्पर्शात् स्वस्वरूपसमाश्रयात् ॥
निहता दानववराः परं वीर्यं प्रकाशितम् ।
तेन ता मातरः प्रोक्ता विश्वसम्भवकारणात् ॥

वीरयामलम्

(१)

[3]उत्क्रान्तिर्विद्यते यस्य तस्य स्यान्मानकल्पना ।
(मानं परिच्छेद इत्यर्थः)
अमाने शून्यनिर्भासे कस्योत्क्रान्तिः क्व च क्रमेत् ॥ १७७५
यदि सर्वगतो देवो वदोत्क्रम्य क्व यास्यति ।
अथाऽसर्वगतो देवो घटतुल्यस्तदा भवेत् ॥

---

१. म० म० प०, पृ० १५२
२. स्प० प्र०, पृ० ११ .
३. वि० भै० वि०, श्लो० १३८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वीरावलिः

(१)

[1]यत्र सर्वे लयं यान्ति दह्यन्ते तत्त्वसंचयाः ।
तां चितिं पश्य कायस्थां कालानलसमत्विषम् ॥

(२)

[2]शशिभास्करसंयोगाज्जीवस्तन्मात्रतां व्रजेत् । १७८०
अत्र ब्रह्मादयो लीना मुक्तये मोक्षकाङ्क्षिणः ॥

(३)

[3]सत्यमेतन्महाप्राज्ञ प्राणायामो न कारणम् ।
(इत्युपक्रम्य)
प्राणायामो न कर्तव्यः शरीरं येन पीड्यते ॥

(४)

[4]अशुद्धं नास्ति तत्किञ्चित् सर्वं तत्र व्यवस्थितम् ।
यत्तेन रहितं किञ्चिदशुद्धं तेन जायते ॥ १७८५

(५)

[5]सर्वेषां वाहको जीवो नास्ति किञ्चिदजीवकम् ।
यत् किञ्चिद् जीवरहितमशुद्धं तद् विजानत ॥
तस्माद् यत् संविदो नातिदूरे तत् शुद्धिमावहेत् ।

---

१. शि० वि०, पृ० २२; त० आ० वि० ५ । १३०; पृ० ४३३
२. त० आ० वि० ४ । ९१; पृ० ९६
३. त० आ० वि० ४ । ९१; पृ० ९७
४. त० आ० वि० ४ । ११८; पृ० १२१; त० आ० वि० ४ । २४३; पृ० २६८
५. त० आ० ४ । २४२-२४३; पृ० २६६-६७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(६)

[1]ज्ञात्वा समरसं सर्वं दूषणादि पुनः कृतम् ।

(७)

[2]यत्ते कुर्युर्न तत्कुर्याद् यद् ब्रूयुस्तत्समाचरेत् । १७९०

(८)

[3]सितासितौ दीर्घह्रस्वौ धर्माधर्मौ दिनक्षपे ।
क्षीयेते यदि तद्दीक्षा व्याप्त्या ध्यानेन योगतः ॥
अहोरात्रः प्राणचारे कथितो मास उच्यते ।

वैहायसी (संहिता)

(१)

[4]विषुवत्कं जपं कुर्यान्नादोर्ध्वध्वनिबोधितम् ।
मन्त्राक्षराणि मणिवच्छक्तौ प्रोतानि भावयेत् ॥ १७९५
तामेव च परे व्योम्नि परमामृतबृंहिताम् ।
दर्शयत्यात्मसद्भावमेवं मन्त्रो हुतिं विना ॥

शचीमतम्

(१)

[5]स्वातन्त्र्यशक्तिर्मेऽसि त्वमतिदुर्घटकारिणी ।
मायेति कीर्त्यसे देवि भर्तुर्मे वैश्वरूप्यदा ॥

---

१. त० आ० वि० ४ । २४४; पृ० २७०
२. त० आ० वि० ४ । २४४; पृ० २७०
३. त० आ० ६ । ७४-७५, पृ० ६५
४. स्प० प्र०, पृ० ३३
५. म० म० प०, पृ० ४६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]योगस्त्वमसि देवेशि योगी चाहं सनातनः। १८००
योगेनेदं त्वया विश्वमाविष्टं शम्भुना मया॥

शाम्भ्वैक्यदीपिका

(१)

[2]विश्वमिदं मन्मयं मत्कार्यत्वात्। यदित्थं तत् तथा, यथा शरीरम्। इदं च मम कार्यम्, तस्मान्मन्मयमिति।

(२)

[3]अन्तर्गता हि प्रकाशव्याप्तिरिदमिति विश्राम्यति, १८०५
बहिर्गता चाहमिति। एतद् द्वयं सर्वजनप्रसिद्धमनपह्नवनीयम्।

शाम्भवदीपिका

(१)

[4]चिन्मयस्वात्मपरमेश्वराराधनेन तदीयस्पन्दविलासात्म षट्त्रिंशत्तत्त्वमयं जगत् पोषयेदित्यर्थः।

---

१. म० म० प०, पृ० १२२
२. म० म० प०, पृ० १८
२. म० म० प०, पृ० १६७
४. म० म० प०, पृ० १२०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]सृष्टिस्थित्युपसंहारनिरोधानुग्रहात्मकम् । १८१०
कृत्यं पञ्चविधं यस्मात्तं नुमः शाश्वतं शिवम् ॥

शिवज्ञानबोधसंग्रहः

(१)

[2]अथ चर्याक्रियापादं योगपादं तथैव च ।
ज्ञानपादं क्रमाच्चैव शिवेन परिभाषितम् ॥
एतच्चतुर्विधं मार्गं सालोक्यादिफलप्रदम् ।

शिवतत्त्वविलासः

(१)

[3]भवद्भवपदं त्वेकं शान्त्यतीतमतः परम् । १८१५
शान्तितत्त्वं च नादाख्यमैशं विद्याख्यमेव च ॥
उदाहृतानि मुक्तानां पदान्येवं क्रमेण षट् ।

शिवधर्मः

(१)

[4]अधर्मभेदा विज्ञेयाश्चित्तवृत्तिप्रभेदतः ।
स्थूलाः सूक्ष्माः सुसूक्ष्माश्च कोटिभेदैरनेकधा ॥

---

१. सौ० ल० सौ०, श्लो० २८
२. श० र० सं०, पृ० ६
३. श० र० सं०, पृ० ८६
४. श० र० सं०, पृ० ५७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवधर्मोत्तरम्

(१)

[1]व्याधीनां भेषजं यद्वत् प्रतिपक्षः स्वभावतः । १८२०
तद्वत् संसारदोषाणां प्रतिपक्षः शिवः स्मृतः ॥
औषधस्य च सामर्थ्याद् यथा दोषं विसर्जयेत् ।
तथात्मज्ञानभैषज्याद् दोषं च विनिवर्तते ॥
तस्मात् स पण्डितः शान्तस्तपस्वी विजितेन्द्रियः ।
शिवज्ञानस्य सम्बन्धाद् भावमालोक्य मुच्यते ॥ १८२५

शैवतन्त्रम्

(१)

[2]शिष्यात्मप्राणमनसां संयोगं प्राणकं विदुः ।

(२)

[3]आत्मना नादमध्ये तु लयं संचार्य तत्त्वतः ।
अकारोकारवर्णादिसंयोगेन वियोगतः ॥
हृदयादिबिलान्तं च विषुवं मन्त्रसंज्ञकम् ।

(३)

[4]मूलमन्त्रत्रिशूलेन भित्वा ग्रन्थीननुक्रमात् । १८३०
नादनाडीसमायोगाद् नाडीविषुवभावनम् ॥

---

१. श० र० सं०, पृ० १३
२. यो० दी०, पृ० ३२६
३. यो० दी०, पृ० ३२७
४. यो० दी०, पृ० ३२७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(४)

[1]अकारोकारवर्णौ च मकारो बिन्दुरेव च ।
नादनादान्तसंज्ञे तु त्यक्त्वा ब्रह्मादिभिः क्रमात् ॥
सप्तमे शक्तिमध्ये तु शिष्यात्मानं विचिन्तयेत् ।
प्रशान्तं तद्विजानीयात् प्रशान्तेन्द्रियगोचरम् ॥ १८३५

(५)

[2]शक्तिमध्यगतो नादः समनान्तं प्रसर्पति ।
तच्छक्तिविषुवं प्रोक्तमुन्मन्यां कालसंज्ञितम् ॥

श्रीकण्ठीयसंहिता

(१)

[3]आदिमान्तविहीनास्तु मन्त्राः स्युः शरदभ्रवत् ।
गुरोर्लक्षणमेतावदादिमान्तं निवेदयेत् ॥

(२)

[4]पृथङ्मन्त्रः पृथङ्मन्त्री न सिद्ध्यति कदाचन । १८४०
ज्ञानमूलमिदं सर्वमन्यथा नैव सिद्ध्यति ॥

श्रीपराक्रमः

(१)

[5]हृत्सरोजान्तरे ध्यायन् पृथिव्यादि शिवान्तकम् ।
गुप्तादितप्तकुसुमक्षेपेणाऽऽसनतां नयेत् ॥

---

१. यो० दी०, पृ० ३३०
२. यो० दी०, पृ० ३३०
३. म० म० प०, पृ० ७१
४. शि० वि०, पृ० ४८
५. यो० दी०, पृ० २४५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]ततो गोमयसंल्लिप्ते चतुरस्रे भुवः स्थले ।
प्रवहच्छ्वासहस्तेन कृतया मत्स्यमुद्रया ॥ १८४५
दिव्यगन्धं तुल्ययुक्तं विलिखेदर्घ्यमण्डलम् ।
वेदास्रवृत्तषट्कोणं त्रिकोणान्यन्तरेऽन्तरे ॥

(३)

[2]निवेद्य मस्तकस्थाय गुरवेऽर्घ्यं तदाज्ञया ।
कल्पान्तहुतभुक्कल्पचिदग्नौ विश्वधस्मरे ॥
मेयराशिमयं हव्यं वासनात्मोपदंशकम् । १८५०
व्यतिषङ्गेन स जुह्वन् जपेदात्मानमामृशन् ॥

षट्सहस्रिका

(१)

[3]दीक्षैव मोक्षदा पुंसां चिदभिव्यक्तिकारिणी ।

(२)

[4]समयी पुत्रकश्चैव साधकाचार्यकौ तथा ।
सर्वेषां योजना कार्या शक्तितत्त्वे तु पुत्रकः ॥
मायातत्त्वे तु समयी विद्यातत्त्वे तु पुत्रकः । १८५५
ईश्वरे साधको भोगे आचार्यः सकले स्थितः ॥
एवं ज्ञात्वा प्रयत्नेन लयभोगौ प्रकल्पयेत् ।
अज्ञात्वा लयभोगौ तु यो दीक्षां कुरुते गुरुः ॥

---

१. यो० दी०, पृ० २५४
२. यो० दी०, पृ० २६३
३. श० र० सं०, पृ० ७०
४. श० र० सं०, पृ० ७८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आचार्यः सह शिष्यैस्तु नरके रौरवे पचेत् ।
देशिकस्तु प्रयत्नात् तु ज्ञात्वा दीक्षां समाचरेत् ॥ १८६०

षड्धातुसमीक्षा

(१)

[1]कर्माणि मोहमूलानि संसृतेः कारणं यतः ।
तत्क्षयात् कर्मनिर्मुक्तः स्वस्थः शान्ततमस्ततः ॥

—:०:—

षाड्गुण्यविवेकः

(१)

[2]साक्षात् त्वमेव वा शास्त्रं त्वदीयैव हि सा मतिः ।
शब्दद्वारेण संक्रम्य संस्करोत्यधिकारिणः ॥

(२)

[3]स्वदेहसाक्षिकं चैतत् सर्वस्य ज्ञानचेष्टितम् । १८६५
ज्ञानानधिष्ठितः कायो लुठत्येव यतो धृतः ॥
अत एव जडानामप्यधिष्ठातृकृता धृतिः ।
गम्यते गगने ग्रावा न धार्येताऽन्यथा कथम् ॥

(३)

[4]अविद्याकृतसंकोचगृहीताहंयुतास्य या ।
तयाऽभिन्नोऽपि भिन्नोऽयं तत्त्वतः स्वप्नभीतवत् ॥ १८७०

---

१. स्प० प्र०, पृ० २१
२. स्प० प्र०, पृ० २
३. स्प० प्र०, पृ० १९
४. स्प० प्र०, पृ० २१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अभीत एव यः स्वप्ने बिभ्यदभ्येति सम्भ्रमम् ।
तस्य स्वप्नादभिन्नस्य को भेदः पारमार्थिकः ॥
तथा हि मिथ्यैव भयं ममेति यदि बुद्ध्यते ।
स्वप्नतत्त्वं परामृश्य भीतिभिन्नैर्न बाध्यते ॥
एवं त्वन्मय एवाऽहमिति भावनया त्वयि । १८७५
प्रलीनाऽहङ्कृतिग्रन्थिः पश्यत्येव त्वदात्मताम् ॥

(४)

[1]नहि बोधो विचित्रार्थनिर्माणेऽन्यमपेक्षते ।
संकल्पादेव यो रूपसहस्राणि सृजत्यजः ॥

(५)

[2]गुणेषु ज्ञानमाद्यन्ते तेन तत्त्वेऽवधारिते ।
धर्मत्वेनेशिता शक्तिर्बलवीर्यौजसां स्थितेः ॥ १८८०

संवित्प्रकाशः

(१)

[3]अपरोक्षे भवत्तत्त्वे सर्वतः प्रकटे स्थिते ।
यैरुपायाः प्रतन्यन्ते नूनं त्वां न विदन्ति ते ॥

(२)

[4]यदिदं दृश्यते किञ्चिद् दर्शनात् तन्न भिद्यते ।
दर्शनं द्रष्टृतो नान्यद् द्रष्टैव हि ततो जगत् ॥

---

१. स्प० प्र०, पृ० २२
२. स्प० प्र०, पृ० २५
३. वि० भै० वि०, पृ० १२४
४. म० म० प०, पृ० २१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(३)

[1]त्यागः शक्यक्रियो यस्य स हेय इति निश्चितः । १८८५
त्यक्तुं न शक्यते यच्च तदुपादेयमित्यपि ॥

(४)

[2]तस्माद् विकल्पः संशुद्धाद् विज्ञानान्नातिरिच्यते ।
तेनैव निर्विकल्पोऽयं विकल्पः स्वात्मनि स्थितः ॥

(५)

[3]इति निर्मलबोधैकरूपे देहपरिग्रहः ।
विवर्तपरिणामाभ्यां द्वाभ्यामप्युपपद्यते ॥ १८९०
विवर्तेऽप्यतथारूपस्तथा भासि त्वमच्युत ।
परिणामे स एव त्वं सुवर्णमिव कुण्डले ॥

(६)

[4]संविन्मूलाद्वर्णरूपाज्ज्ञानस्तम्भात् सरस्वती ।
प्रागघोषा सनादाऽनु पुण्यतीर्था प्रवर्तते ॥
तत्प्रवृत्त्या प्राणयति शक्तिः सा विश्वमोजसा । १८९५
प्रतियान्ती पुनस्त्वासां संकोचयति संभवम् ॥
कार्यानुरूपं सा रूपं तथा नामापि बिभ्रती ।
निर्वाहयति विश्वस्मिंश्चित्रां यात्रां चराचरम् ॥

---

१. म० म० प०, पृ० २३
२. म० म० प०, पृ० २६
३. स्प० प्र०, पृ० ४
४. स्प० प्र०, पृ० ६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(७)

[1]वागेवास्याः कारणं विश्ववृत्ते-
न्यार्य्यं चैतन्नागमः केवलोऽयम् । १९००
नासङ्कल्पं किञ्चिदस्तीह कार्यं
वाचं विना न विकल्पोऽस्ति कश्चित् ॥

(८)

[2]अत्यन्ताच्छस्वभावत्वात् स्फटिकस्य यथा स्वकम् ।
रूपं परोपरक्तस्य नित्यमेवोपलभ्यते ॥
तथा भावसमासक्तं भगवंस्तावकं वपुः । १९०५
अत्यन्तनिर्मलतया पृथक् तैर्नोपलभ्यते ॥
नैतावताऽसौ स्फटिकः पृथग् नास्त्येव रञ्जकात् ।
भावरूपपरित्यक्ता तव वा निर्मला तनुः ॥

(९)

[3]माया त्वमेतदेव स्यान्नाशस्तत्त्वप्रदर्शनात् ।
नहि विज्ञातरज्ज्वात्मा सर्पादीन् मन्यते पुनः ॥ १९१०

(१०)

[4]कर्मेदं त्वत्कृतमपि त्वन्मयं येन माधव ।
विहीनाऽहङ्कृति ततस्त्वमेव परिशिष्यसे ॥
एतावतैव भेदोऽस्य यदहम्मानिताऽऽत्मनि ।
सा चेद्विलीना त्वद्भक्त्या नष्टो भेदः स्थितैकता ॥

---

१. स्प० प्र०, पृ० ९
२. स्प० प्र०, पृ० १६
३. स्प० प्र०, पृ० २०
४. स्प० प्र०, पृ० २२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संवित्स्तोत्रम्

(१)

[1]आदिमान्तिमगृहीतवर्णरा- १९१५
श्यात्मिकाहमिति या स्वतः प्रथा ।
मन्त्रवीर्यमिति साधितागमै-
स्तन्मयो गुरुरसि त्वमम्बिके ॥

(२)

[2]त्वामुपासितगुरूत्तमाः परां
वाचमाहुरविभक्तविश्वकाम् । १९२०
स्वप्रकाशनविमर्शनात्मिकां
वक्ति वागिति निरुक्तिमाश्रिताः ॥

संविदुल्लासः

(१)

[3]अन्योन्यमप्रतीकारा वाध्यबाधकभावतः ।
वदन्ति तव वैश्वात्म्यं वादिविप्रतिपत्तये ॥

(२)

[4]प्रामाणिकी विधिनिषेधकथा यदि स्यात् १९२५
पर्यन्ततः परम एव शिवः प्रमाणम् ।
सर्वोत्तरः स खलु तत्र विधिं निषिद्धे
कर्तुं क्षमेत विहिते च विभुर्निषेधम् ॥

---

१. म० म० प०, पृ० ७१
२. म० म० प०, पृ० १२९
३. म० म० प०, पृ० १२
४. म० म० प०, पृ० २३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(३)

[1]अर्चिःप्ररोहे महतः प्रमातु-
र्नातिस्फुटत्वे च बहिःप्रथा मे। १९३०
अपेक्षते प्रेक्षितुमात्मदर्शं
सूर्योदयं तद्व्यवधिं च लोकः ॥

(४)

[2]औष्ण्यं हुताश इव शीतलिमानमिन्दौ
शय्यासु मार्दवमिवाश्मसु कर्कशत्वम्।
बाह्येषु मोहमिव योगिषु च प्रबोधं १९३५
स्वातन्त्र्यमस्ति हि नियन्त्रयितुं महन्मे ॥

(५)

[3]वेद्योपरागविभवेन विमोह्यमानं
लोहान्तरव्यतिकरादिव लब्धकार्ष्ण्यम्।
ज्वालावलीभिरमितस्य विमर्शवह्निः
स्वच्छं हिरण्यमिव मे हृदयं विधत्ते ॥ १९४०

(६)

[4]द्वैतादन्यदसत्यकल्पमपरैरद्वैतमाख्यायते
तद्द्वैते बत पर्यवस्यति कृतं वाचाटदुर्विद्यया।
एते ते वयमेवमभ्युदयिनः कस्यापि कस्याश्चिद-
प्यालस्योज्झितमैकरस्यमुभयोरद्वैतमाचक्ष्महे ॥

---

१. म० म० प०, पृ० २९
२. प० म० प०, पृ० ३२
३. म० म० प०, पृ० ३३
४. म० म० प०, पृ० ७८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(७)

[1]उद्योगमयमालस्यं प्रकाशैकात्मकं तमः । १९४५
अशून्यं शून्यकल्पं च तत्त्वं किमपि शाम्भवम् ॥

(८)

[2]स्वविभवविमर्शसुरभीण्याददते देवताः प्रसूनानि ।
ननु काननेषु सुलभं यदि तत् सामान्यसौरभात् तृप्तिः ॥

(९)

[3]पुण्ड्रेक्षोरिव मन्त्रस्य माधुर्ये हृदयस्पृशि ।
ऋजीषमानने तिष्ठत्यक्षरोच्चारलक्षणम् ॥ १९५०

(१०)

[4]विश्वं मूर्तिर्वैखरीनाम माला
यस्यैश्वर्यं देशकालातिलङ्घि ।
तद्भक्तानां स्वैरचारः सपर्या
स्वेच्छा शास्त्रं स्वस्वभावश्च मोक्षः ॥

(११)

[5]धन्याः केचिद्धनमिव विभोरागमैर्गोप्यमानां १९५५
व्याकुर्वाणां जगदपरथा वीरविक्रान्तिविद्याम् ।
माधुर्यस्य प्रथमपदवीं मङ्गलानां प्रतिष्ठां
मान्त्रीं शक्तिं मनसि महतीं देवतेत्याद्रियन्ते ॥

---

१. म० म० प०, पृ० १०४
२. म० म० प०, पृ० १११
३. म० म० प०, पृ० १२७
४. म० म० प०, पृ० १२७
५. म० म० प०, पृ० १५१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(१२)

[1]पुष्पोपहारघनचन्दनवंशताल-
नृत्तप्रयोगमधुमुग्धवधूप्रधानाः । १९६०
भावाः सहस्रमपि जाग्रतु तत्तदन्तः
प्रह्लादिनी विजयते परचित्कलैका ॥

(१३)

[2]आदर्शयोरिवान्योन्यं लम्भितप्रतिबिम्बयोः ।
शिवशक्त्योरनन्ताः स्युरन्तरन्तः प्रसक्तयः ॥

संकर्षणसूत्राणि

(१)

[3]स्वात्मैकनिष्ठं चिद्रूपं भावाभावपरिष्कृतम् । १९६५
स्वसंवेदनसंवेद्यं प्रकृत्यातीतगोचरम् ॥
इयं योनिः स्मृता विप्र मन्त्राणां प्रत्ययात्मिका ।
ते मन्त्रा वर्णरूपेण सबाह्याभ्यन्तरोदिताः ॥
नैष्कालिकपदावस्थाः करणानीव देहिनाम् ।
प्रयुक्ताः सर्वकालेषु सिद्ध्यन्ते वीर्ययोगतः ॥ १९७०

(२)

[4]येनेदं दृश्यते विश्वं द्रष्टा सर्वस्य यः सदा ।
दृश्यश्चराचरस्त्वे यः स विष्णुरिति गीयते ॥

---

१. म० म० प०, पृ० १५२
२. म० म० प०, पृ० १५८
३. स्प० प्र०, पृ० ३३
४. स्प० प्र०, पृ० ३९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संकेतपद्धतिः

(१)

[1]पञ्चशक्तिचतुर्वह्निसंयोगाच्चक्रसंभवः ।

(२)

[2]एतत्कामकलाव्याप्तं गुह्याद् गुह्यतरं महत् ।
नाशिष्याय प्रवक्तव्यं नाभक्ताय कदाचन ॥ १९७५
एतत्प्रकाशनं मातुरुद्घाटनमुरोजयोः ।
आकृष्याच्छादनमिव तस्मान्नैतत् प्रकाशयेत् ॥
लोभान्मोहाच्च गर्वाच्च वैदुष्याद्वा प्रकाशयेत् ।
सोऽचिरान्मृत्युमाप्नोति शस्त्राघातविषादिभिः ॥

(३)

[3]वशिन्योऽष्टौ सान्तरालं.....। १९८०
.....अनाख्या सर्वगा ततः ॥

(४)

[4]मननात् त्राणधर्माऽसौ मन्त्रोऽयं परिकीर्तितः ॥

(५)

[5]अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ।
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ॥
अनयोः सामरस्यं यत् परस्मिन् महसि स्फुटम् । १९८५
वामाद्यैः पञ्चभिर्योऽसावीश्वरः परिकीर्तितः ॥

---

१. सौ० ल० सौभा०, श्लो० ११
२. सौ० ल० सौभा०, श्लो० १९
३. यो० दी०, पृ० ६१
४. यो० दी०, पृ० ६७
५. यो० दी०, पृ० १३४ : पङ्क्तित्रयमन्त्रस्यं प्रारम्भिकं ९,१३,३३ पृष्ठेष्वपि दृश्यते ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आदावस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता ।
अम्बिका बाहुरित्युक्ता ज्येष्ठा चैव नखाग्रजा ॥
एता हार्धकलारूपा रूपपञ्चतया स्थिताः ।
अवर्णः सर्ववर्णानां न पृथग् भासते बहिः ॥ १९९०
इच्छा शिरःप्रदेशस्था ज्ञानं च तदधोगतम् ।
क्रिया पादगता ह्यस्य शान्ता हृन्मध्यगा भवेत् ॥
अष्टधाऽनाहतः प्रोक्तः शून्यादिप्रविभागतः ।
शून्यः स्पर्शस्तथा नादो ध्वनिर्बिन्दुस्तथैव च ॥
शक्तिबीजाक्षरं चेति ह्यष्टधाऽनाहतः स्मृतः । १९९५
चत्वारिंशत्सप्तसंख्याऽनाहतः परिकीर्तितः ॥
क्षकारः कथितो योऽसौ संयोगाद् द्विविधः स्मृतः ।
सप्तषष्ट्याख्यमेवं हि मातृकापीठमुत्तमम् ॥
अनाहतत्रिभिर्भेदैर्हतोत्तीर्णैः समन्ततः ।
स्थितो योऽसौ महापीठो मातृकाख्यो जयत्यसौ ॥ २०००

(६)

[1]न पूजा बाह्यपुष्पादिद्रव्यैर्या प्रथिताऽनिशम् ।
स्वे महिम्न्यद्वये धाम्नि सा पूजा या परा स्थिता ॥

(७)

[2]द्वैताद्वैतमहामोहशर्वरीक्षपणक्षमः ।
भास्वानिव जयत्येको गणेशो दूतरीयुतः ॥
प्रतिभायाः परोल्लासो निशाकर इवाऽपरः । २००५
दूतीयुक्तः स जयति बटुकस्ताण्डवान्वितः ॥

---

१. यो० दी०, पृ० १५५
२. यो० दी०, पृ० २२६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सत्कार्यसिद्धिः

(१)

[1]नहि स्वनिष्ठे विज्ञाने इतरेतरवेदनम् ।
तस्मात् पूर्वापरावस्था(प्रमाण)परिपिण्डितः ॥
एकः प्रमाता चित्राभिर्वृत्तिभिर्व्यवहारभाक् ।

समाधिपञ्चदशी

(१)

[2]यदेतस्यापरिज्ञानं तत् स्वातन्त्र्योपकल्पितम् । २०१०
स एव खलु संसारो जडानां यस्तु भीषणः ॥

सम्बन्धसिद्धिः

(२)

[3]तेनानेकस्य रूपस्य श्लेष ऐकात्म्यमेव सः ।

---

१. स्प० प्र०, पृ० १५
२. म० म० प०, पृ० २८
३. म० म० प०, पृ० १३८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वज्ञभैरवः

(१)

[1]नान्यत्र गमनं स्थानं मोक्षोऽस्ति सुरसुन्दरि ।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते ॥

सर्वज्ञानोत्तरम्

(१)

[2]न पुंभिरार्षवाक्यं च वैदिकं चर्षिभिस्तथा । २०१५
न देवैर्ब्रह्मणो वाक्यं वैष्णवं पद्मजन्मजैः ॥
न शैवं विष्णुवचनैर्बाध्यते तु कदाचन ।

(२)

[3]यो हि बाधयते पापः स मूढो नष्टचेतनः ।
उत्तरोत्तरवैशिष्ट्यं सर्वेषां परिकीर्तितम् ॥

(३)

[4]ये तु वर्णाश्रमाचाराः प्रायश्चित्ताश्च लौकिकाः । २०२०
संबन्धान् देशधर्मांश्च प्रसिद्धान्न विचारयेत् ॥
गर्भाधानादितः कृत्वा यावदुद्वाहमेव च ।
तावत्तु वैदिकं कर्म पश्चाच्छैवे ह्यनन्यभाक् ॥
न मुख्यवृत्त्या वै स्कन्द लोकधर्मान् समाचरेत् ॥

---

१. स्प० प्र०, पृ० ७
२. त० आ० वि० ४ । २४९; पृ० २७६
३. त० आ० वि० ४ । २५०; पृ० २७७
४. त० आ० वि० ४ । २५१; पृ० २७७–२७८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(४)

[1]उच्चार्यमाणा ये मन्त्रा न मन्त्रांश्चापि तान् विदुः । २०२५
मोहिता देवगन्धर्वा मिथ्याज्ञानेन गर्विताः ॥

(५)

[2]निष्कला परमा शक्तिरचिन्त्या सर्वतोमुखी ।
संसूक्ष्मा निर्मला नित्यानन्दा निर्वाणदायिनी ॥
या विजृम्भति तत्त्वेषु.....चैव हि ।
तया धृतं जगत् सर्वमेकयाऽनेकरूपया ॥ २०३०
अस्या ऊर्ध्वं निरालम्बं निराधारं निरामयम् ।
अचिन्त्यं व्यापकं शान्तं सृष्टिसंहारवर्जितम् ॥

(६)

शक्त्यभिधानं विन्दुतत्त्वमेव परमकारणमित्युक्तम्—
[3]अतोर्ध्वं वैन्दवं तत्त्वं विमलं सर्वतोमुखम् ।
परमं सर्वतत्त्वानामनन्तज्योतिरूपकम् ॥

(७)

[4]तत्त्वैरेभिर्निबद्धात्मा सर्वधर्मैश्च संयुतः । २०३५
नाऽनेन शक्यते भोक्तुं वर्ज्यं दीक्षां शिवात्मिकाम् ॥

(८)

[5]कलानां निलयो यस्मात् तेनाऽसौ केवलः स्मृतः ॥

---

१. शि० वि०, पृ० ३८
२. श० र० सं०, पृ० ४१
३. श० र० सं०, पृ० ४५
४. श० र० सं०, पृ० ६९
५. श० र० सं०, पृ० ७८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(९)

[1]यस्तु जाग्रदवस्थायां नियम्य सकलेन्द्रियान् ।
तुर्यावस्थागुणोपेतस्तां विना भावयेत् पुनः ॥
स जीवन्मुक्त इत्युक्तो देहान्ते मुक्त उच्यते । २०४०

तथा—

न हृष्यत्युपकारेण नापकारेण तप्यति ॥
यः समः सर्वभूतेषु जीवन्मुक्तः स कथ्यते ।

(१०)

[2]शिवज्ञानामृतं पीत्वा विचरस्व यथासुखम् ।

(११)

[3]शिववच्छाश्वतः शुद्धः सृष्टिधर्मविवर्जितः ।
सत्यं सत्यं पुनः सत्यं त्रिसत्यं समयः कृतः ॥ २०४५
अतः परतरं नास्ति विज्ञेयं कुत्रचिद् गुह ।

सर्वमङ्गलाशास्त्रम्

[4]शक्तयोऽस्य जगत्कृत्स्नम्..... ..... ।

---

१. श० र० सं०, पृ० ८२
२. श० र० सं०, पृ० ८७
३. श० र० सं०, पृ० ८९
४. शि० वि०, पृ० ८९, ११७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते ।
शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः ॥

सर्ववीरः

(१)

[2]अज्ञानात् शङ्कते लोकस्ततः सृष्टिश्च संहृतिः । २०५०
मन्त्रा वर्णात्मकाः सर्वे सर्वे वर्णाः शिवात्मकाः ॥

(२)

[3]तस्य स्वेच्छाप्रवृत्तत्वात् कारणानन्ततेष्यते ।
कदाचिद् भक्तियोगेन कर्मणा विद्ययाऽपि वा ॥
ज्ञानधर्मोपदेशेन मन्त्रैर्वा दीक्षयापि वा ।
एवमाद्यैरनेकैश्च प्रकारैः परमेश्वरः ॥ २०५५
संसारिणोऽनुगृह्णाति विश्वस्य जगतः पतिः ।

(३)

[4]अनादिमति संसारे कारणं परमेश्वरः ।
स्वभावेनैव जन्तूनामनुग्रहपरः सदा ॥
तया बद्धान् शिवो जन्तून् स्वेच्छया मोचयत्यतः ।

---

१. शि० वि०, पृ० ८९, ११७; त० आ० वि० ५ । ४०; पृ० ३४७, ३७४
२. प्र० ह०, सू० १२, २७; म० म० प०, पृ० २८
३. त० आ० ४ । ५५–५७; पृ० ६१–६२
४. त० आ० वि० ४ । ५५–५७; पृ० ६२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(४)

[1]इच्छैव कारणं तस्य..... । २०६०

सर्वस्रोतःसंग्रहसारः

(१)

[2]येन येन हि रूपेण साधकः संस्मरेत् सदा ।
तस्य तन्मयतां याति चिन्तामणिरिवेश्वरः ॥

सर्वाचारः

(१)

[3]अज्ञानाद् बध्यते लोकस्ततः सृष्टिश्च संहृतिः ।

सात्वतसंहिता

(१)

[4]ज्ञानं शिवं परं बोधमपरं तन्त्रसंज्ञितम् ।

---

१. त० आ० वि० ४ । ५५–५७; पृ० ६२
२. श० र० सं०, पृ० २०
३. शि० वि०, पृ० ११
४. श० र० सं०, पृ० ७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सारशास्त्रम्

(१)

[1]धर्माधर्मात्मकं भावैरनेकैर्वेष्टयेत् स्वयम् । २०६५
असन्देहं स्वमात्मानमवीच्यादिशिवान्तके ॥
तद्वच्छक्तिसमूहेन स एव तु विवेष्टयेत् ।
स्वयं बध्नाति देवेशः स्वयं चैव विमुञ्चति ॥
स्वयं भोक्ता स्वयं ज्ञाता स्वयं चैवोपलक्षयेत् ।
स्वयं युक्तिश्च मुक्तिश्च स्वयं देवी स्वयं प्रभुः ॥ २०७०
स्वयमेकाक्षरा चैव यथोष्मा कृष्णवर्त्मनः ।

सार्धशतिकम्

(१)

[2]द्वादशारं महाचक्रं रश्मिरूपं प्रकीर्तितम् ।
नाम चैव प्रवक्ष्यामि रश्मीनां तु यदास्थितम् ॥
सृष्टिः स्थितिश्च संहारो रक्तकाली तथैव च ।
खकाली यमकाली च मृत्युकाली तथैव च ॥ २०७५
रुद्रश्च परमार्कश्च मार्तण्डश्च ततः परः ।
कालाग्निरुद्रकाली च महाकाल्यभिधा पुनः ॥
महाभैरवशब्दश्च घोरशब्दस्ततः परः ।
चण्डकालीपदं चान्ते त्रयोदश उदाहृताः ॥

---

१. त० आ०———
२. त० आ० वि० ४। १४९; पृ० १६१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धातन्त्रम्

(१)

[1]अनायासमनारम्भमनुपायं महाफलम् । २०८०
श्रोतुमिच्छामि योगेश योगं योगविदांवर ॥

(इति देव्याः पृष्टे)—

शृणु देवि प्रवक्ष्यामि योगामृतमनुत्तमम् ।
यत्प्राप्य शिवतां मर्त्या लभन्त्यायासवर्जिताः ॥
न चैतदप्रसन्नेन शङ्करेणोपदिश्यते ।
कथञ्चिदुपलब्धेऽपि वासना न प्रजायते ॥ २०८५

(इत्याद्युपक्रम्य)—

तस्मात्तदभ्यसेन्नित्यमविरक्तेन चेतसा ।
स विसर्गो महादेवि यत्र विश्रान्तिमर्हति ॥
गुरुवक्त्रं तदेवोक्तं शक्तिचक्रं तदुच्यते ।
तदेव सर्वमन्त्राणामुत्पत्तिस्थानमुत्तमम् ॥

सिद्धान्तदीपिका

(१)

[2]शिवेच्छाप्रेरितानन्दनाथविक्षोभिता पुनः । २०९०
घृतकीटनयादेकदेशेन परिणामता ॥

---

१. त० आ० वि० १ । १२३-१२४; पृ० २५७
२. श० र० सं०, पृ० ४९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शक्त्यात्मककलादीनि प्रयान्ति स्थूलरूपताम् ।
नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः ॥

सिद्धान्तरहस्यसारः

(१)

[1]विद्यादिपञ्चतत्त्वानां वागिन्द्रियसहायता ।
वैखर्यादिविभेदश्च भोगकाले नृणां भवेत् ॥ २०९५
नादः सूक्ष्मो भवेद् बिन्दुः पश्यन्ती मध्यमाक्षरम् ।
मातृका वैखरी ज्ञेया नादाद्यास्तु शिवादयः ॥
कण्ठोष्ठ्यमीश्वरीतत्त्वे विद्यायां वैखरी स्थिता ।
सूक्ष्मादयो वस्तिनाभिहृद्ग्रीवास्येषु संस्थिताः ॥
वैखर्यन्यश्रोत्रगता कण्ठोष्ठ्यं स्वश्रुतिं गता । २१००
सविकल्पा मध्यमा स्यात् पश्यन्ती निर्विकल्पयुक् ॥
आसां सूक्ष्मा कारणं स्याद् ब्रह्मघोषं तदुच्यते ।

सिद्धान्तवचनम्

(१)

[2]विग्रहो विग्रही चैव सर्वविग्रहविग्रही ।

---

१. श० र० सं०, पृ० ५३
२. प्र० ह०, सू० ४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धान्तसारावलिः

(१)

[1]शक्तिश्चित्तनुरीश्वरस्य करणं ज्ञेयेषु कार्येषु तद्
भेदैः सोपहिता प्रयाति गुणतो भेदं क्रियाज्ञानतः । २१०५
नित्यं तत् सकलान्यकर्तृनिहिता वर्त्मन्यशुद्धे सिते
कृत्यं सैव करोति पत्यनुगता वामादिशक्त्यात्मिका ॥

(२)

[2]वाग्धीकायात्मसाध्यं फलजननकरं
कर्म धर्मादिभोग्यम् ।
स्वापे चायाति पाकं स्थितिमतिसंहितं २११०
भोगदं स्यात् कलान्तम् ॥

सिद्धामतम्

(१)

[3]कथितं गोपितं तेभ्यस्तस्माल्लेख्यं न पुस्तके ।
गुरुवक्त्रात्तु लभ्येत अन्यथा न कदाचन ॥

(२)

[4]स्वमन्त्ररक्षणं यत्नात् सर्वदा कारयेत् सुधीः ।

---

१. श० र० सं०, पृ० २२
२. श० र० सं०, पृ० ५७
३. त० आ० वि० ४ । ६७–६८; पृ० ७३
४. त० आ० वि० ४ । ६७–६८, पृ० ७४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(३)

[1]अर्थपट्कं च दीक्षा च शिवशास्त्रमिति स्मृतम् । २११५
दीक्षाध्वा निर्भयो भोगशास्त्रे भैरवसंज्ञके ॥

(४)

[2]सात्र कुण्डलिनी बीजजीवभूता चिदात्मिका ।
तज्जं ध्रुवेच्छोन्मेषाख्यं त्रिकं वर्णास्ततः पुनः ॥
आइत्यवर्णादित्यादि यावद् वैसर्गिकी कला ।
ककारादिसकारान्ताद् विसर्गात् पञ्चधा स च ॥ २१२०
बहिश्चान्तश्च हृदये नादेऽथ परमे पदे ।
बिन्दुरात्मनि मूर्धान्ते हृदयाद्व्यापको हि सः ॥
आदिमान्त्यविहीनास्तु मन्त्राः स्युः शरदभ्रवत् ।
गुरोर्लक्षणमेतावदादिमान्त्यं च वेदयेत् ॥
पूज्यः सोऽहमिव ज्ञानी भैरवो देवतात्मकः । २१२५
श्लोकगाथादि यत्किञ्चिदादिमान्त्ययुतं यतः ॥
तस्माद्विदंस्तथा सर्वं मन्त्रत्वेनैव पश्यति ।

सिद्धोक्तम्

(१)

[3]अदृश्यं नेत्रवद् ब्रह्म द्रष्टृत्वं चाऽस्ति नेत्रवत् ।
स्वात्मन्येवोपलम्भोऽस्य दर्शनं घटवन्न तु ॥

---

१. म० भ० प०, पृ० ७, १३८
२. शि० वि०, पृ० ६५–६७
३. स्प० प्र०, पृ० १५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धान्तसारावलिः

(१)

[1]शक्तिश्चित्तनुरीश्वरस्य करणं ज्ञेयेषु कार्येषु तद्
भेदैः सोपहिता प्रयाति गुणतो भेदं क्रियाज्ञानतः । २१०५
नित्यं तत् सकलान्यकर्तृनिहिता वर्त्मन्यशुद्धे सिते
कृत्यं सैव करोति पत्यनुगता वामादिशक्त्यात्मिका ॥

(२)

[2]वाग्धीकायात्मसाध्यं फलजननकरं
कर्म धर्मादिभोग्यम् ।
स्वापे चायाति पाकं स्थितिमतिसंहितं २११०
भोगदं स्यात् कलान्तम् ॥

सिद्धामतम्

(१)

[3]कथितं गोपितं तेभ्यस्तस्माल्लेख्यं न पुस्तके ।
गुरुवक्त्रात्तु लभ्येत अन्यथा न कदाचन ॥

(२)

[4]स्वमन्त्ररक्षणं यत्नात् सर्वदा कारयेत् सुधीः ।

---

१. श० र० सं०, पृ० २२
२. श० र० सं०, पृ० ५७
३. त० आ० वि० ४ । ६७–६८; पृ० ७३
४. त० आ० वि० ४ । ६७–६८, पृ० ७४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(३)

[1]अर्थपट्कं च दीक्षा च शिवशास्त्रमिति स्मृतम् । २११५
दीक्षाध्वा निर्भयो भोगशास्त्रे भैरवसंज्ञके ॥

(४)

[2]सात्र कुण्डलिनी बीजजीवभूता चिदात्मिका ।
तज्जं ध्रुवेच्छोन्मेषाख्यं त्रिकं वर्णास्ततः पुनः ॥
आइत्यवर्णादित्यादि यावद् वैसर्गिकी कला ।
ककारादिसकारान्ताद् विसर्गात् पञ्चधा स च ॥ २१२०
वहिश्चान्तश्च हृदये नादेऽथ परमे पदे ।
विन्दुरात्मनि मूर्धान्ते हृदयाद्व्यापको हि सः ॥
आदिमान्त्यविहीनास्तु मन्त्राः स्युः शरदभ्रवत् ।
गुरोर्लक्षणमेतावदादिमान्त्यं च वेदयेत् ॥
पूज्यः सोऽहमिव ज्ञानी भैरवो देवतात्मकः । २१२५
श्लोकगाथादि यत्किञ्चिदादिमान्त्ययुतं यतः ॥
तस्माद्विदंस्तथा सर्वं मन्त्रत्वेनैव पश्यति ।

सिद्धोक्तम्

(१)

[3]अदृश्यं नेत्रवद् ब्रह्म द्रष्टृत्वं चाऽस्ति नेत्रवत् ।
स्वात्मन्येवोपलम्भोऽस्य दर्शनं घटवन्न तु ॥

---

१. म० भ० प०, पृ० ७, १२८
२. शि० वि०, पृ० ६५–६७
३. स्प० प्र०, पृ० १५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(२)

[1]यद्वत् प्रकाशभवने प्रकाश्यविषयो न दृश्यते मातः । २१३०
संपर्कात् तव तद्वत् संविद् वेद्ये न भाव्यते जातु ॥

(३)

[2]चिद्व्योम्निस्थोऽनुसन्धत्ते यत्तत्पश्यत्वखण्डितम् ।

सुप्रभेदागमः

(१)

[3]योगाभ्यासं ततः कृत्वा ज्ञानं तत्र तदाभ्यसेत् ।
तदाऽज्ञानान्धकारं च ज्ञानदीपेन नाशयेत् ॥

(२)

[4]सालोक्यं चैव सामीप्यं सारूप्यं सायुज्यकं तथा । २१३५

(३)

[5]तदूर्ध्वं विन्दुतत्त्वं तु तदूर्ध्वे नाद एव तु ।
तदूर्ध्वं शक्तितत्त्वं हि तत्त्वं तत्त्वे तदूर्ध्वतः ॥
अतोर्ध्वे शिवतत्त्वं स्यात् सर्वतत्त्वोपरि स्थितम् ।
शिवाद्यवनिपर्यन्तं व्यापकं तेन तेजसा ॥

---

१. स्प० प्र०, पृ० २८
२. स्प० प्र०, पृ० ४३
३. श० र० सं०, पृ० ६
४. श० र० सं०, पृ० ६
५. श० र० सं०, पृ० ४४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

(४)

[1]अध्यात्ममधिभूतं च आधिदैविकमेव च। २१४०
त्रिविधं दुःखमाप्नोति तेषामाध्यात्मिकं शृणु ॥
आध्यात्मिकं द्विधा प्रोक्तं शारीरं मानसं तथा।
गुल्मोऽर्शमतिसारं च ज्वरशूलाद्यनेकधा ॥
नर-मृग-पिशाचैश्च गो-यक्ष-चोर-राक्षसैः।
प्रोक्तं शरीरजं दुःखं मानसं शृणु सुव्रत ॥ २१४५
शोकासूयावमानेर्ष्यामात्सर्यादिभिरेव च।
एवं मानसमाख्यातमाधिभौतिकमुच्यते ॥
शीतोष्णवातवर्षैश्च विद्युदशनिमारुतैः।
एतैर्भूतैस्तु यद् दुःखमाधिदैविकमुच्यते ॥
गर्भजन्मजराऽज्ञानमृत्युनरकजं तथा। २१५०
प्रोक्तं दुःखत्रयं ह्येवमेषु स्थानेषु भुज्यते ॥

(५)

[2]त्र्यवस्थः पुरुषः प्रोक्तः शुद्धः सकलः केवलः।
शुद्धावस्थानमात्मानं शिवरूपमिति स्मृतम् ॥

(६)

[3]अमूर्तः स पशुर्नित्यो निर्गुणो निष्क्रियोऽप्रभुः।
मायोदरगतो व्यापी भोगोपायेष्वशक्तितः ॥ २१५५.
स केवलस्त्विति प्रोक्तः स्वापवान् मलबन्धनात् ॥

(७)

[4]त्रिमलैर्बध्यते चात्मा सकलः परिवारितः।
सकलश्चेति बद्धात्मा संसारी विषयी तथा ॥

---

१. श० र० सं०, पृ० ५६
२. श० र० सं०, पृ० ५८
३. श० र० सं०, पृ० ५९
४. श० र० सं०, पृ० ६५०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षेत्री क्षेत्रज्ञो भोक्ता च पशुर्ज्ञानी तथैव च।
भोगी चैव शरीरी च आत्मपर्यायवाचकः॥ २१६०

(८)

[1]शिवे संयोजितं रूपं सायुज्यमिति कथ्यते।

(९)

[2]अग्निदग्धानि बीजानि न प्ररोहन्ति भूतले।

(१०)

[3]शरीरारब्धकर्माणि भुज्यन्ते स्वयमेव तु।

(११)

[4]हिङ्गुत्यक्ते तु तत्पात्रे गन्धस्तत्र न नश्यति।
कुलालचक्रं कर्मान्ते यथा भ्रमति वै तथा॥ २१६५

(१२)

[5]घटगुप्तो यथा दीपो घटनाशे तु दीप्यते।
घटागुप्तो यथा भानुर्मुक्तौ चापि तथा भवेत्॥
स्वभावज्ञानतो मुक्तिः स जीवन्मुक्त एव हि।
देहनाशे परा व्याप्तिर्घटनाशे तु दीपवत्॥

---

१. श० र० सं०, पृ० ८५
२. श० र० सं०, पृ० ९१
३. श० र० सं०, पृ० ९१
४. श० र० सं०, पृ० ९२
५. श० र० सं०, पृ० ९३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुभगोदयः

(१)

[1]मूलादिब्रह्मरन्ध्रान्तं मूलविद्यां विभावयेत् । २१७०
उद्यदादित्यसंकाशां तटित्कोटिसमप्रभाम् ॥
तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत् ।

(२)

[2]पराहन्तामये संविदग्नौ संवेद्यतर्पणे ।
इदन्तालक्षणं हव्यं जुहुयादबहिर्मुखः ॥

(३)

[3]दर्शाद्याः पूर्णिमान्ताश्च कलाः पञ्चदशैव तु । २१७५
षोडशी तु कला नित्या सच्चिदानन्दरूपिणी ॥

(४)

[4]इच्छादिशक्तित्रितयं पशोः सत्त्वादिसंज्ञकम् ।
महत्त्र्यश्रं चिन्तयामि गुरुवक्त्रादनुत्तरात् ॥
अष्टारव्यपदेशोऽयं चिन्निर्वाणैषणादिकम् ।
सूक्ष्मं पुर्यष्टकं देव्या मतिरेषा हि गौरवी ॥ २१८०
अन्तर्दशारवसुधा ज्ञानकर्मेन्द्रियाणि च ।
महात्रिपुरसुन्दर्या इति संचिन्तयाम्यहम् ॥
बाह्यो दशारभागोऽयं बुद्धिकर्माक्षगोचरः ।
चतुर्दशारवसुधाकरणानि चतुर्दश ॥

---

१. सौ० ल० सौभा०, श्लो० २१
२. म० मं० प०, पृ० १३२
३. सौ० ल० अरु०, पृ० ४६; सौ० ल० लक्ष्मी०, पृ० १४९
४. यो० दी०, पृ० ४५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वसुच्छदनपद्माङ्कदेशो यश्चक्रगो विभुः । २१८५
अव्यक्ताद्याः प्रकृतयो भूतान्ता निश्चिनोम्यहम् ॥
षोडशच्छदपद्माङ्कदेशो भूताक्षमानसम् ।
विकारात्मकतापन्नं देव्याः सम्भावयाम्यहम् ॥

सुभगोदयः

(१)

[1]परोऽपि शक्तिरहितः शक्तः कर्तुं न किञ्चन ।
शक्तः स्यात् परमेशानि शक्त्या युक्तो भवेद्यदि ॥ २१९०

(२)

[2]षोडशकलानां षोडशनित्यात्मकत्वात् । तासां प्रतिपदादि-शुक्लपक्षकृष्णपक्षतिथ्यात्मकतया वृद्धिक्षयसद्भावात् चन्द्रस्यापि सहस्रकमलगतस्य वृद्धिक्षयौ भवत एव ॥

(३)

[3]सूर्यमण्डलमध्यस्थां देवीं त्रिपुरसुन्दरीम् ।
पाशाङ्कुशधनुर्बाणहस्तां ध्यायेत् सुसाधकः ॥ २१९५
त्रैलोक्यं मोहयेदाशु वरनारीगणैर्युतम् ।

---

१. सौ० ल० लक्ष्मी०, पृ० ८०
२. सौ० ल० लक्ष्मी०, पृ० ९९
३. सौ० ल० लक्ष्मी०, पृ० १८७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुभगोदयव्याख्या

(१)

[1]शिखिज्वालारूपः समय इह सैवात्र समया
तयोः संभेदो मे दिशतु हृदयाब्जैकनिलयः ॥

सोमराजः

(१)

[2]श्रीमद्वामनभानुः क्रमकमलविकासने चतुरः ।
जयति षडध्वप्रोज्झितपरनभसि निबद्धसंतानः ॥ २२००

(२)

[3]येन ध्वस्तः समस्तो गहनतरमहामोहघोरान्धकारो
दत्तः सम्यक्प्रकाशः क्रमकमलवनोल्लासविश्रान्तिरूपः ।
प्राप्ता येनैव संविन्निरुपमसरसास्वादसंयोगभोगा
वन्दे श्रीभोजराजं गुरुवरमहितं पूज्यमर्हद्भिरन्तः ॥

सोमसिद्धान्तः

(१)

[4]पञ्चधा लौकिकं तन्त्रं तथा तन्त्रं च वैदिकम् । २२०५
तन्त्रमाध्यात्मिकं तद्वदतिमार्गं तथैव च ॥
तथैव मन्त्रतन्त्राख्यं तेषु यद् बहुधेरितम् ।

---

१. सौ० ल० लक्ष्मी०, पृ० १७५
२. त० आ० वि० ४।१७३; पृ० १९६
३. त० आ० वि० ४।१७३; पृ० १९७
४. श० र० सं०, पृ० ८-९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सौभाग्यकाण्डम्

(१)

[1]तिस्रः पुरस्त्रिपथा विश्वचर्षणा
अत्राकथा अक्षराः संनिविष्टाः ।
अधिष्ठायैना अजरा पुराणी २२१०
महत्तरा महिमा देवतानाम् ॥
नवयोनिं नव चक्राणि दीधिरे
नवैव योगा नव योगिन्यश्च ।
नवानां चक्रा अधिनाथाः स्योना
नव भद्रा नव मुद्रा महीनाम् ॥ २२१५
एका स आसीत् प्रथमा सा नवासी-
दा सोनविंशादा सोनत्रिंशत् ।
चत्वारिंशादथ तिस्रः समिधा
उशतीरिव मातरो माविशन्तु ॥

(२)

[2]कामो योनिः कमला वज्रपाणि- २२२०
